फाल्गुनः
वर्षम् –६७
पञ्चमोऽङ्कः
विक्रमाब्दः २०७२
युगाब्दः ५११७
५ मार्च २०१६

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



## विषय-सूची



| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | संस्कृत-भाषा विज्ञानञ्च | साँवरमलशास्त्री | ५ |
| ५ | स्थापत्यशास्त्रादिदिशा अथर्ववेदीया ....... | प्रो. सुरेन्द्रकुमारशर्मा | ७ |
| ६ | संस्कृतानुरागी कविः श्रीमदनूपसिंहः | बद्रीप्रसादशर्मा | १२ |
| ७ | पुत्रिकासमीक्षा | देवर्षिकलानाथशास्त्री | १५ |
| ८ | संस्कृतसमाचाराः | प्रधानसम्पादकः | १८ |
| ९ | षट्त्रिंशः प्रसङ्गः-श्रेष्ठगुणाः वारं वारं सुफलं........ | श्रीमती आराधना धर्माधिकारी | १९ |
| १० | पूज्यबाबामहोदयानामान्दोलनकारिस्वरूपम् | वेणीमाधव गो. धर्माधिकारी | १९ |
| ११ | विंश-शताब्द्याः राजस्थानस्य नाट्यपरम्परा | पवनकुमारशर्मा | २० |
| १२ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २३ |
| १३ | श्रीमद्दादूदर्शनं तस्य आचार्यपरम्परा च | श्रीमती अञ्जना शर्मा | २४ |
| १४ | भार्ये ! त्वं मधुमोहिनी मधुभरा | डॉ. राजेशकुमारगुप्तः | २५ |
| १५ | व्याकरणशास्त्रम् | डा. सुरेन्द्रकुमारशर्मा | २६ |
| १६ | क्रीडनकम् | परमानंदशर्मा ''प्रमोद'' | २७ |
| १७ | नृत्येन मृणालिनी, मृणालिन्या च नृत्यम् | डॉ. राजेश्वरी भट्टः | २८ |
| १८ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |



### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः।।

ISSN2249-689X

# भारती

## संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी
डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम् :
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

भक्त्या यः परिपूजयेत् प्रतिदिनं गङ्गाम्भसा केवलम्,
तस्मै वाञ्छितमप्यरं शुभफलं तुष्टः शिवो यच्छति।
तस्माद्दीनजनाः शिवं प्रमुदिताः सिञ्चन्ति वै वारिणा,
तुष्टं तं हितसाधकं नतियुता वन्दामहे शङ्करम्।।

## मासावतरणम्

आरामेषु हि फाल्गुने युवतयः क्रीडन्ति कान्तैः सह,
होलारङ्गमहोत्सवे नटवरः कृष्णोऽपि खेलारतः।
नृत्येनातिमनोहरेण रसिकः प्रीणाति गोपाङ्गनाः,
उद्वाहेऽपि च फाल्गुनः सुविदितः सौभाग्यदः सर्वदा।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

फाल्गुनमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2072
मार्च, 2016
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अङ्कः - 5

( राजस्थानसंस्कृत-अकादम्या आर्थिकसहयोगेन प्रकाशिता )

## सम्पादकीयम्

# आतङ्कवादमुन्मूलयितुं जयपुरे अन्ताराष्ट्रियमेकं सम्मेलनं संजातम्

...✍ पं. प्यारेमोहनशर्मा

भारतस्य राष्ट्रपतिः श्रीप्रणवमुखर्जी सम्मेलनस्य मुख्यातिथिपदमलञ्चकार। सम्मेलने गृहमन्त्री राजनाथः राष्ट्रीयसुरक्षापरामर्शदाता तथा विभिन्नदेशानां प्रतिनिधयो भागमगृह्णन्। दिनद्वयपर्यन्तं विभिन्नसत्रेषु सहभागिनो विश्वस्मिन् विश्वे प्रसृतमातङ्कवादमादाय वृद्धिंगतां हिंसा-मादाय स्वां स्वां चिन्तां प्राचीकटन्। आतङ्कवादं ये वर्धापयन्ति तेषां देशानां भर्त्सनामकार्षुः। राष्ट्रपतिमहोदया अकथयन् आतङ्कवादो मानवतां विनङ्क्ष्यति। सर्वे चिन्तां तु प्राचीकटन् परन्तु न हि केनापि आतङ्कवादं समापयितुं कापि योजना विरचिता कथं आतङ्कवाद-प्रसारकर्तॄन् देशान् हठपूर्वकं बाध्यानकारयन्। राष्ट्रीयसुरक्षापरामर्शदाता अजीतडोभाल अकथयत् यद्रणनीत्या सह क्रियात्मकता दृष्टिपथे समागच्छेत्। परन्तु (एक्शन) क्रिया कदा भवेत् कीदृशी भवेत् कः कुर्यात् इत्यत्र सहमतिर्नैव संजाता। सहमतिं बिना क्रिया (एक्शन) कथं भविष्यति।

दुर्घटनानन्तरं नेतारः उच्चैराक्रोशं व्यञ्जयन्ति वदन्ति च सहनशक्तिरधुना समाप्तिं गता आतङ्कवादं समूलमुन्मूल-यिष्यामः। आतङ्कवादपोषकान् सम्प्रति दण्डेन शिक्षां प्रदास्यामः। परन्तु केवलं भाषन्ते न किमपि कुर्वन्ति। तेषां कथनं समाप्तिसमकालमेव पुनः कुत्रापि आतङ्कवादिनो हिंसां कुर्वन्ति निघ्नन्ति निरागसान्। पठानकोटे यज्जातं तदतिभयावहमासीत्। घटनानन्तरमस्माकं प्रधानमन्त्री गृहमन्त्री रक्षामन्त्रीप्रभृतयः सर्वे नेतार उच्चैरजूघुसन्। नेत्रेभ्य अश्रूण्यपातयन्। पाकिस्ताने प्रमाणानि प्रैषयन्। प्रतिवेशिनापि शीघ्रं दुष्टानन्विष्य दण्डयिष्यामीति प्रत्युत्तरितम्। परन्तु समयो व्यत्येति। अद्यावधि न किमपि संजातम्। पाकिस्तानोऽकथयत् नैतानि प्रमाणानि पर्याप्तानि अतः अन्यानि प्रमाणानि संप्रेषयन्तु। एतत्तु तथैव वर्तते ''रात्रौ पूर्णरूपेणारुदन् प्रातः शवः समुत्थाय अधावत्''। आतङ्कवादसम्मेलनेषु यदा वैश्विकः समुदायो मतैक्यां न भजते यावत् संयुक्ता रणनीति नाङ्गीक्रियते संयुक्तरूपेण दण्डनीतिर्न सुस्थिरा भविष्यति तावत् न कथमपि आतङ्कवादः समाप्तो भविष्यति। आतङ्कवादसमाप्तिविषये महान्तो देशाः एकमताः न सन्ति। एकस्मिन् देशे आक्रमणे जाते द्वितीयो देशः सम्मिलितकार्ये न भागं गृह्णाति। यतोहि तत्र आतङ्कवादमुत्पादयितुं स देशोऽसम्मिलितो भवति। तस्य हितं तत्रैव। सीरिया लीबिया अफगानिस्तान ईराकदेशाः उदाहरणस्वरूपाः सम्मुखे वर्तन्ते। वस्तुतस्तु आतङ्कवादसमाप्तिसम्मेलनेषु सम्मिलितकार्यक्रमस्य निर्णयो विधेयः। आतङ्कवादेन त्रस्तं विश्वं सम्प्रति वार्ताः नैव वाञ्छति निर्णयमभिलषति। कर्गदेषु लिखितमेव नैव क्रियारूपेण सम्मुखे तत् दृश्यं भवेत्। तदैव विश्वं रक्तपातेन सुरक्षितं भविष्यति। अन्यान् देशान् त्यजन्तु परन्तु भारतं तु दृढनिश्चयं कुर्यात् यत् तादृश्यां स्थितौ स किं विधास्यति ? अधुना तु वयमपि यथा वदामो न तथा कुर्मः। देशवासिनस्तु सर्वकारत आशामेव कुर्वन्ति। भारविणा **उक्तमपि व्रजन्ति ते मूढधियः पराभवं, भवन्ति मायाविषु ये न मायिनः। प्रविश्य हि घ्नन्ति शठास्तथाविधान् असंवृताङ्गान् निशिता इवेषवः।**

# संस्कृत-भाषा विज्ञानञ्च

...✍ **साँवरमलशास्त्री**

अस्मिन् जगति बह्व्यः भाषाः सन्ति किन्तु संस्कृतभाषा प्राचीनतमा सर्वभाषाजननी च निगद्यते भाषाविद्भिः। देववाण्यां यादृक् वैशिष्ट्यमुपलभ्यते तन्नास्ति भाषास्वपरासु। यथा श्रीमद्वाल्मीकीयरामायणे किष्किन्धाकाण्डे रामहनुमतोः प्रथममिलनावसरे हनुमन्मुखात् संस्कृतवाचं श्रुत्वा रामो लक्ष्मणं व्याजहार–

**एतच्छुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत्**
**प्रहृष्टवदनः श्रीमान् भ्रातरं पार्श्वतः स्थितम्**
**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्**
**बहुव्याहरतानेन न किञ्चिदपशब्दितम्**
**संस्कारक्रमसम्पन्नामद्भुतामविलम्बिताम्**
**उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम्**
**कस्य नाराध्यते चित्तम् ''उद्यतासेररेरपि''**

भाषामिमामाकर्ण्य वधाय हस्तोद्यतकृपाणस्य शत्रोरपि हृदयं परिवर्तते। इदं भाषावैशिष्ट्यं भगवता रामेण प्रमीयते। भारतवर्षस्य पार्श्वे ईदृक् किं वस्त्वासीद् यस्य बलेन देशोऽयं जगद्गुरुत्वं लेभे? तदस्ति विपुल-माध्यात्मिकं दर्शनम्। विवेकानन्दोऽपि तल्लब्ध्वा विदेशेषु भारतस्य मस्तकमुदनयत्, राष्ट्राय च गौरवमदापयत्।

त्रीणि वचनानि नोपलभ्यन्ते भाषास्वन्यासु। ''पितरौ'' ''जायापती'' ''दम्पती'' इत्यादयः शब्दाः कथं बहुवचने एकवचने च प्रयोक्तुं शक्यन्ते? त्रीणि वाच्यान्यपि सुरभारत्यामेव सन्ति। भाववाच्यं नास्त्यन्यत्र। आँग्लभाषा याऽन्ताराष्ट्रियभाषाऽवबुध्यते जनैः, तत्रापि नास्ति ण्यन्तप्रक्रियाप्रयोगः। ते क्रियापरिवर्तनेन कार्यं चालयन्ति।

संस्कृतवाङ्मये शब्दकोशः महीयान् वर्तते। यथा पृथिव्याः सप्तविंशतिः नामानि सन्ति। अपरभाषासु एतावती संख्या नास्ति भूमेः पर्यायशब्दानाम्। नूतनशब्दनिर्माणसामर्थ्यं, (2097) सप्तनवत्यधिकद्वि-सहस्रधातुसंख्या, आत्मनेपदविधानं, परस्मैपदविधानं, ण्यन्तप्रक्रिया, तद्धितप्रकरणं, लिङ्गानुशासनं, विभक्ति-प्रयोगः, स्त्रीप्रत्ययादीनां यादृशी व्यवस्था संस्कृतवाचि मिलति तन्नास्त्यन्यत्र। वेदाः, उपनिषदः, पुराणानि, न्याय-साँख्ययोगायुर्वेदज्योतिषव्याकरणसाहित्यदर्शनादीनां शास्त्राणां विशालं वाङ्मयं सुरभारतीं पुष्णाति। नेयं जीवति कस्यचिदनुकम्पया।

यद्यपि सम्प्रति नास्ति संस्कृतं जनभाषा किन्तु पुरा भारते न केवलं जना अपितु पक्षिणोऽपि संस्कृतं वदन्ति स्म। यदा शङ्कराचार्यः मण्डनमिश्रमहाभागेन सह शास्त्रार्थं विरचितुं तद्ग्राममाससाद तदा मिश्रपादानां धाम्नः जिज्ञासवे शङ्कराचार्याय तद्ग्रामवासिनीनां पुरन्ध्रीणा-मासीदियं वाक् – ''शुकाङ्गनाः यत्र गिरो गिरन्ति, अवेहि तन्मण्डनमिश्रधाम।'' अनेन प्रमाण्यते यत्पुरा भारते पतत्रिणोऽपि संस्कृतं वदन्ति स्म।

यस्मिन् राष्ट्रे रामकृष्णसदृशाः लोकोत्तरपुरुषा अवातरन् तस्मिन् देशे सम्प्रति भ्रष्टाचारः, दुराचारः, राष्ट्रप्रेमाभावः, मर्यादाविलोपनं, सांस्कृतिकप्रदूषणं, धर्मान्धिता, क्षेत्रवादः, जातिवादः, राजनीत्यशुचिता, इत्यादयो विप्लवाः सुरभारत्यारुपेक्षया जायन्ते निखिलञ्च राष्ट्रमुद्विजते। यदि शिक्षायां संस्कृतस्य प्राचुर्येण सन्निवेशः स्यात्तदा अमी दोषाः परिमार्जितुं शक्यन्ते।

संस्कृतभाषा तु वैज्ञानिकी भाषा अस्त्येव किन्त्वस्यां भाषायां विज्ञानमपि निहितं वर्तते। आयुर्वेदशास्त्रे (Hydrophobia) जलसन्त्रासरुजः प्रसङ्गे ग्रन्थकारेण समुल्लिखितं वर्तते यदस्याः रुजः चिकित्सायै परमात्मापि

नास्ति सक्षमः। अस्माकं वैज्ञानिकः ग्रन्थलेखकः परमात्मानमुदतेजयत् (He challenged God)। तेनेदमपि नैव चिन्तितं लेखनात्प्राक् यदियं धरित्री कमपि वैज्ञानिकं जन्यात्तदा किं भविष्यतीश्वरोत्तेजनस्य। किन्त्वद्यावधि धरेयं नाजनि वैज्ञानिकमीदृशं यो रोगस्यास्योपचारमनुसंधेयात्। एतादृग्विज्ञानं वर्तते संस्कृतवाङ्मये।

अस्माकं षोडशसंस्कारेषु द्वितीयः संस्कारः पुंसवनसंस्कारो निगद्यते। यदा स्त्रियः कुक्षौ द्विमासिको भ्रूणो भवति तदा न्यग्रोधजटानां श्वेतपुष्पवत्याः कण्टालिकायाः रसद्वयं सम्मेल्य कैश्चिन्यन्त्रैः निपूय दक्षिणनासारन्ध्रेण गर्भिणीं पाययते। अनेन भूमिगतः बीजगतश्च दोषः परिमृज्यते। विवाहसंस्कारे लाजाहवनेऽग्नौ शमीपत्रमिश्राः लाजाः कन्ययाऽऽहूयन्ते। अत्रापि वर्तते विज्ञानम्। ''शमीमिवाभ्यन्तरलीनपाव-काम्'' इत्यनुसारं यावत्परिमितोऽग्निः शमीवृक्षे भवति तावत्परिमितोऽग्निः नास्त्यपरेषु वृक्षेषु। तद्गन्धधूमादि-सेवनेन कन्यायां प्रजननोष्मः प्रवर्धते। तया चोष्णतया सन्ततिः जायते। एवमेव कन्यया कृशानौ भर्जितास्तण्डुलाः (लाजाः) आहूयन्ते। अस्यां पृथिव्यां कन्यातण्डुलयोः प्राकृतिकं साम्यं वर्तते। कन्या यत्र जायते तत्र सा न लभते सन्ततिम्। तद्वत् तण्डुलः यत्र प्ररोहति तत्र फलं न लभते। क्षुद्रपादपस्थानान्तरणादेव स तण्डुलपादपः धान्योत्पादको भवति न च प्ररोहणस्थले। अतोऽस्माकं संस्काराः विज्ञानमूलकाः वर्तन्ते।

संस्कृतवाङ्मये ज्योतिषं शास्त्रं पूर्णरूपेण विज्ञानोपेतं वर्तते। अनेन शास्त्रेण संस्कृतस्य वैज्ञानिकता प्रमाण्यते। स्तोकं विचिन्त्यताम् यदस्माकं ज्योतिर्विदः पूर्ववर्तिनः विद्वान्सः कया रज्ज्वा ग्रहाणां मार्गं मापितवन्तः ? केन यन्त्रेण ग्रहाणां गतिं ममिरे ? सूर्यचन्द्रग्रहणे क्षणमात्रस्याप्यन्तरं न जायते। अमेरिकादेशस्य नासाक्षेत्रे अद्यतनाः वैज्ञानिकाः एकमासावधौ पञ्चदशदिवसेषु संस्कृतं पठन्ति। तत्र मयदानवस्य सूर्यसिद्धान्तः पाठ्यते। आर्यभट्टस्य वराहमिहिरस्य च ग्रन्थाः पाठ्यन्ते।

**यदि भारतवर्षेऽस्मिन् पुराऽऽदर्शविचिन्तनम्।**
**संस्कृतेः रक्षणे चिन्ता भूयात् संस्कृतरक्षणम्।।**

साहित्यप्राध्यापकचरः
राजकीय-संस्कृत-महाविद्यालयः
कालाडेरा (जय. राज.)

## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 120/-, पंचवर्षीय शुल्क 500/-, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारती**

खाता संख्या – **2139101912502**

**IFS Code - CNRB0002139**

# स्थापत्यशास्त्रादिदिशा अथर्ववेदीया विशिष्टसिद्धान्ताः

❑ प्रो. सुरेन्द्रकुमारशर्मा

वेदो हि नाम समग्रज्ञानविज्ञानविशेषज्ञापकं शाश्वतिकं शास्त्रम्। अयं हि न केवलं भारतवर्षस्यापितु विश्वस्यापि विश्वस्य प्राचीनतमोऽनुपमश्च ज्ञानराशिः। विद् ज्ञाने धातोः घञ्‌ प्रत्यये निष्पन्नोऽयं वेदशब्दः स्वयमेवास्य ज्ञानराशित्वं प्रख्यापयति। भारतीया मनीषा वेदस्यापौरुषेयत्वं सुतरां प्रतिपादयति। ऋग्वेदीये भाष्ये सुप्रसिद्धः भाष्यकार आचार्यः सायणः **'अपौरुषेयं वाक्यं वेदः'** इति प्रतिपाद्य मतमिदं सिद्धान्तत्वेन प्रतिष्ठापयति। भाष्यकारैः आचार्यैः बहुधा व्याकृतं परिभाषितञ्च वेदस्वरूपम्। यथाहि ऋक्प्रतिशाख्य-वृत्त्युपक्रमे- **'विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादि-पुरुषार्था इति वेदाः-'** **'इष्टप्राप्त्यनिष्ट-परिहारयोरलौकिकमुपायं यो वेदयते स वेदः'** इत्याचार्यः सायणः। **'विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति, विदन्ते लभन्ते सर्वाः सत्यविद्याः यैर्येषु वा'** इति ऋग्वेदादिभाष्य-भूमिकायां प्रतिपादयति महर्षिर्दयानन्दः सरस्वती।

सुविदितमेवैतत् विदुषां यत् प्रत्यक्षानुमानादि-भिर्लौकिकैः प्रमाणैर्यद्वस्तुज्ञानं नास्ति सम्भवं तद्वस्तुज्ञानमलौकिकेनैवोपायेन कर्तुं शक्यते। अत एव कृष्णयजुर्वेदीयभाष्यभूमिकायामिष्टप्राप्त्यनिष्टपरिहार-योरलौकिकोपायत्वे वेदः परिभाषितः सायणाचार्येण। न केवलं परिभाषित अपितु एतस्मादेव वेदस्य वेदत्वमिति सिद्धान्तितं तत्रैवाचार्येण –

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता।। इति।।**

तदेवमेतेषां सर्वेषामपि व्युत्पादनानां तात्पर्यभूतोऽर्थः समान एव। स चार्थः वेदानां निखिलविद्यानिधानत्वे अपौरुषेयत्वे च पर्यवसित इति तत्त्वम्। अयमेव वेदः श्रुतिः आम्नायः, निगमः, इत्यादिभिः शब्दैरपि व्यवह्रियत इति। रचनावैविध्येन 'त्रयी' इति नाम्नापि वेदस्य ख्यातिरिति-विदितमेव सुमेधसाम्। यथा मीमांसाशास्त्रे मुनिः जैमिनी **'तेषामृग्यत्रार्थवशेन पादव्यवस्था, गीतिषु सामाख्या, शेषे यजुः शब्द इति'** (मीमांसा सू 2, 1, 32, 33, 34) एवमेव न्यायशास्त्रे आचार्यो माधवः **'सोऽयं गद्य-पद्य-गानलक्षणतया त्रयी संज्ञितो वेदः, ऋग्यजुःसामाथर्वेति चतुःसंहितासु विभक्तो विषयभेदात्'** इति कृत्वा प्रतिपादयति। प्रतिपादनेनानेन ये केचन 'त्रयीति' संज्ञया त्रय एव ऋग्यजुः सामाख्याः वेदाः, आसन्, अथर्ववेदस्तु वस्तुतो नास्ति वेदः, अपितु उक्तवेदत्रय्याः परिशिष्टरूप एवास्तीति मन्यन्ते, तेषामियं मान्यतापि स्वत एव प्रत्याख्याता भवति। एवं यथैतेषां रचनानुबन्धी त्रयीपदव्यवहारः सूचितस्तथैव मन्त्रगतक्रियानुरोधेनापि वेदत्रैविध्यं समुपपादितं यास्काचार्येण-तथाहि- **'ता ऋचः, परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्चेति भेदात्त्रिविधाः। ऋक्शब्दोऽत्र मन्त्रवचनः, यासु प्रथमपुरुषक्रियास्ताः परोक्षकृताः, यासु मध्यमपुरुषक्रियास्ताः प्रत्यक्षकृताः, यासु चोत्तमपुरुषक्रियास्ता आध्यात्मिक्य इति।'** एवं त्रयीपदव्यवहारे रचनात्रैविध्यतया, मन्त्रगतक्रियानुरोधतया चाचार्यैः कारणं स्पष्टीकृतमतः सुतरां सिध्यति यत् यत्र कुत्रापि वेदे जायमानः त्रयीपदव्यवहारः वेदचतुष्टयत्वं नैव निरसयति। एवं रचनानिबन्धनोऽयं त्रयीपदव्यवहारः न खलु तत्संख्या-निबन्धनः। अत एव अथर्ववेदस्यापि ऋग्यजुःसामवत् वेदत्वमित्यसन्दिग्धम्।

इदानीं स्वाभाविकतया प्रश्नोऽयं समुदेति, प्राय उत्थाप्यते अपि सर्वैर्यत् को नाम विषयो वेदानां प्रतिपाद्योऽस्ति ? तत्र मामकीनोऽयं प्रतिप्रश्नो यत् को नाम स विषयो यः खलु वेदेषु न प्रतिपादितः? यथास्माभिरुपरि वर्णितासु परिभाषासु स्पष्टं ज्ञातं यन्निखिलवस्तुज्ञानविज्ञान-परोऽयं वेदः, अतः को नाम वेदानामविषयीभूतो विषयः?

वक्तुं शक्यते यन्नास्ति कोऽप्येतादृशो विषयश्चराचरजगत्-सम्बन्धी यो वेदेषु नैव चर्चितः। कुत इयं सृष्टिः? इति प्रश्न अद्यापि वैज्ञानिके युगे भृशं मश्नाति वैज्ञानिकानां मनांसि। वैज्ञानिका अपि यन्मूल-मनुसन्धातुं यत् समाश्रयन्ति, तद् ऋग्वेदीयं नासदीयसूक्तं सृष्ट्युत्पत्तिविकासक्रमं तद्रहस्यञ्च विवृणोति यादृशं, तद्वैज्ञानिकानामपि कुतूहलं जनयति। अपि च सृष्ट्युत्पादकस्य परब्रह्मणो विराट्पुरुषस्य महिमानं निरूपयतः, तत एव च निखिलजगदुत्पत्तिं विवेचयतः अन्यतमस्य पुरुषसूक्तस्य महत्त्वं को नाम न जानाति, यत्र न केवलं पुरुषविशेषाज्जगत उत्पत्तिरेव वर्णिताऽपितु समाजस्य वर्णव्यवस्थापनं, वेदानामाविर्भावः, प्राणिनामैहिकोन्नतिसाधनपुरस्सरं तन्मोक्षमार्गसाधनादिकं सकलमपि सृष्ट्युपयोगितत्त्वजातं, प्रकृतेर्निगूढं रहस्यञ्च सम्यक् प्रपञ्चितं वर्तते।

निखिलविश्वप्रपञ्चस्य जीवननिर्वहणार्थं यावदपेक्षित-मावश्यकञ्च यज्ज्ञानं तावन्मात्रं तज्ज्ञानं परमात्मना वेदमाध्यमेन प्रदत्तमिति निर्विवादम् वेदज्ञानं न केवलं कस्मैचिद् भूभागविशेषाय न च कस्मैचिद् वर्गविशेषाय, अपितु विश्वस्यापि विश्वस्य मनुष्यमात्राय प्रदत्तं परमकारुणिकेन भगवता। अतएव तु मनुः कथयितुं प्रभवति-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**
**इति मनुस्मृतिः**

'सर्वज्ञानमयो हि सः' इति कृत्वाऽसंदिग्धतया वेदस्य सर्वज्ञानमयत्वमेव पुष्णाति महर्षिर्मनुः।

अस्तु नाम, इदानीं चर्चाप्रसङ्गे समालोचनीयस्य विषयस्य मूलस्थापत्यस्य दर्शनम् प्रथमतया अथर्ववेद एव जायते। सुविदितमेवैतत् यत्पुरो दृश्यमानः सकलोऽपि जागतिकः प्रपञ्चः पाञ्चभौतिक एवास्ति। न केवलं प्राणिन एवापितु तदुपयोगि समस्तवस्तुजातमाश्रयभूत-मावासादिकञ्च पञ्चमहाभूतानामेव परिणामरूपाः सन्ति। अतएव मानवो यदि, पृथिव्यादिपञ्चमहाभूतानां शक्तिं, प्रभावं क्षमताञ्चाकलय्य वास्तुशिल्पं चिन्तयेत्तर्हि तस्य सर्वविधसुखसाधनं समेधते। स्थापत्यशास्त्रं (वास्तुशास्त्रं) नामैका सा प्रक्रिया यस्या गृहादिनिर्माणाय भूमेः चयनं, ततश्च गृहस्य निर्माणं, तत्र प्रवेशविधिः, शान्त्यात्मकं पूजाहवनादिकर्म, तथा च शिल्पकला इत्यादीनां सकलतत्त्वानां समावेशो जायते। तत्र प्रथमन्तावत् भूमिपरीक्षणस्यैव चर्चां यदि कुर्मस्तर्हि पश्यामो वयं यत् वास्तुशास्त्रीयग्रन्थेषु पृथिव्याः वर्ण-गन्ध-ध्वनिस्पर्शादीनि तत्त्वानि समालोचनीयतामर्हन्ति। यतोहि पृथ्वी एव विविधभाषाभाषिणां, नानाधर्मावलम्बिनाञ्च मनुष्याणामा-श्रयदात्री वर्तते, अतः मानवमात्रस्य समृद्धये अथर्ववेदीय ऋषिस्तत्र पृथ्वीसूक्ते कामयते-

**जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्।**
**सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती।।**
**-अथर्ववेदः- 12,1,45**

आश्रयदातृत्वात् भवनादिनिर्माणे प्रथमतया भूमेर्मृत्ति-कायाश्च गुणवत्तायाः परिक्षणमभीष्टं भवति। तत्र वर्णः, गन्धः स्पर्शादयश्च परीक्षणीयाः भवन्ति। यथा चोक्तमपि वास्तुविद्भिर्भूमिरेव सदाधारा गृहाणां सुखसम्पदाम्। **तस्माद् भवननिर्माणे प्रथमं भूपरीक्षणम्। भूमेर्वर्णं तथा गन्धं स्वादं स्पर्शं तथाकृतिम् सर्वथा वास्तुवित्सम्यक् परीक्षेज्जनताहिते।** इत्येवमादि तत्त्वानां पर्याप्ताः सङ्केताः वेदेषूपलभ्यन्ते। तद्यथा प्रथमम् अथर्ववेदीयं भूमिसूक्तमेव समीक्षणीयं यत्रोक्तं '**माताभूमिः पुत्रोऽहं पृथिव्याः**' इति।

तत्र मन्त्रोऽयम्-

**गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु।**
**बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।**
**अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम्।।-**
**अथर्ववेदः- 12/1/11**

अत्र 'रोहिणीति' पदेन भूमेरुर्वरकत्वं, कृष्णेतिपदेन वर्णत्वम्, ध्रुवामितिपदेन च भूमेःकठोरत्वं येन तत्र गृहादिस्थितिः समीचीना स्यात्। इन्द्रगुप्तामितिपदेन भूमेः पूर्वदिगोन्मुखत्वं, पूर्वदिग्भागप्रसृतत्वञ्च सूच्यते।

तथा च-

**विश्वस्वम् मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्। शिवां स्योनामनु चरेम विश्वहा।। - अथर्ववेदः 12/1/17**

एतादृश्यां पृथिव्यां निर्मिते गृहे वसतिं कुर्वन् मानवः स्वस्याजीतत्वादजीर्णत्वं (स्वास्थ्यम्) अहतत्वम् (अपराभवत्वम्, जीवनसुरक्षाम्) अक्षतत्वम् (अहानित्वम्) च साधयितुं शक्नोतीति मन्त्रः स्पष्टं सङ्केतयति।

अन्यच्च पृथिव्याः गन्धवतीत्वन्तु सिद्धमेव। तत्र कीदृशो गन्धः वास्तुविदामभीष्टः भूमिपरीक्षणे तस्यापि सङ्केतः तत्रैवाथर्ववेदे प्राप्तुं शक्यते। स च यथा-

**यस्ते गन्धः पृथिवि संबभूव यं बिभ्रत्योषधयो यमापः। यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु, मा नो द्विक्षत कश्चन।। - अथर्ववेदः 12/1/23**

एतेषु मन्त्रेषु ऋषिः पृथिव्याः गन्धस्य तमंशं कामयते, यो गन्धांशः तस्य ऐश्वर्याय शत्रूणां विनाशाय प्रभविष्णुर्भवितुं शक्नोति। नूनं यो गन्धः औषधीन् पुष्करादींश्च पुष्णाति सः गन्धः गृहनिर्माणार्थमपि शुभवहो भवितुं शक्नोति। जलमपि यं गन्धं प्राप्य जीवनाय कल्पते सः गन्धः वास्तुविदामप्यपेक्षते।

एवमादिपरीक्षणं विधायैव तत्र भूमौ कृतं गृहं नूनं सर्वविधक्षेमाय, ऐश्वर्याय च कल्पते। अतएव वैदिक ऋषिस्तत्रैव नगर-ग्राम-सभा-समित्यादीनां निर्माणमेव न केवलं कामयते, अपितु निर्मितानामेतेषां वैशिष्ट्यमप्युप-पादयति। तद्यथा-

**यस्याः पुरो देवकृताः क्षेत्रे यस्या विकुर्वते। प्रजापतिः पृथिवीं विश्वगर्भामाशामाशां रण्यां नः कृणोतु।। -अथर्ववेद 12/1/43**

अपि च-

**ये ग्रामा यदरण्यं याः सभा अधि भूम्याम्।**
**ये संग्रामाः समितयस्तेषु चारु वदेम ते।।**

-अथर्वदेवः 12/1/56

वर्णनेनानेन सुतरामेतत् सिध्यति यत् 'देवकृताः' इत्यत्र देवा इति विद्वांसः, अतः देवकृताः पुरः (नगराणि) वैदिकयुगे आसन्। अर्थात् प्रबुद्धैः वास्तुविद्धिः शिल्पिभिः नगरर्माणं, सभा-समित्यादीनां भवननिर्माणं, ग्रामाणामव-स्थितिरच सर्वमेतत् सुविचायैव सम्पादितमासीत्। तदैव तत्र शेभनचरणं यशोगानादिकञ्च सम्भवी समभवत्। विद्वद्भिर्ग्राम-नगर-सभा-समित्यादिनिर्माणयोजना सुविचार्यैव कृताऽऽसीत् तेनैव प्रतिदिशं रमणीयत्वं काङ्क्षितमासीदन्यथा तु अद्यतनसभा-समितिषु कलहात्मकमसहयोगात्मकं यादृशं वातावरणं सततमनुभूयते तादृशमेव तत्राप्यभविष्यत्।

एवमस्मिन् पृथिवीसूक्ते विभिन्नमन्त्रेषु वास्तुविदां कृते पर्याप्ताः सङ्केताः समुपलभ्यन्ते, एतत् सुतरां निर्णेतुं शक्यते यद् वेदे वास्तुशास्त्रस्य स्रोतांसि समुपलभ्यन्ते।

इदानीं गृहाः कीदृशाः भवेयुस्तेषां स्थापत्यं कीदृशं स्यादिति दृशा विचारयामश्चेदेको ऋग्वेदीयः मन्त्रस्तत्र यबिर्दिशति, यत्र वास्तोष्पतिं सम्बोध्य किञ्चित् समुद्घाटितं वर्तते, तदस्माकं मार्गदर्शनायालम्। स हि यथा-

**वास्तोष्पते ध्रुवा स्थूणांऽसत्रं सोम्यानाम्।**
**द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा।।**

ऋग्वेदः 8/17/14

सामेवेदेऽपि पूर्वार्चिके तृतीयेऽध्याये मन्त्रोऽयं लभ्यते। अत्र वर्णितमस्ति यत् हे गृहाधिष्ठातृदेव ! ध्रुवाः (दृढाः) स्थूणा (स्तम्भाः) येषां तादृशाः दृढस्तम्भवन्तः सौम्यानां मनुष्याणां गृहाः भवन्तु। त्वमुत्तमकर्मकर्तृणां जनानां रक्षकः असि, तथा शत्रूणां नाशकः, साधकानां मुनीनाञ्च सखा अपि।

अद्यापि गुर्जरप्रदेशे अन्यत्रापि च ग्रामेषु यत्र काष्ठमयं गृहाच्छादनं भवति तत्र दृढाः दारुस्तम्भाः तस्याधारत्वेन स्थाप्यन्ते। तेऽद्यापि लोके 'थूण' इति शब्देन व्यवह्रियन्ते। अद्यत्वे नैकतलाः ये विशालाश्चोन्नताः गृहाः निर्मीयन्ते तत्र लोह-रोडीसीमेन्टादिमिश्रणद्रव्योपयोगेन दृढाः स्तम्भाः आधारभूताः क्रियन्ते। अस्य स्थापत्यस्य मूलं वेदे

समुपलभ्यत इत्यसन्दिग्धं प्रतीयते।

एतदतिरिक्तमपि ऋग्वेदे 'वास्तोष्पतिः' इति सूक्तमुपलभ्यते, यत्र मन्त्रत्रयं विद्यते। एतेषु मन्त्रेषु वास्तोष्पतिं सम्बोध्य ऋषिः सुखदानामारोग्यकराणां धनधान्यादि-समृद्धिकराणां गृहाणां कामनां करोति। यथा-

**वास्तोष्पते प्रति जानीह्यस्मान् स्वावेशो अनमीवो भवानः।**
**यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।।**

ऋग्वेद: 7/54/1

मन्त्रेऽस्मिन् ऋषिः प्रार्थयते यत् हे गृहाधिष्ठातृदेव! (गृहपालक) त्वमस्मान् सुखप्रापणाय प्रतिजानीहि। अस्माकं गृहप्रवेशः सुखकरः, आरोग्यप्रदश्च भूयात्। वयं त्वां प्रति प्रवेशायागच्छामस्त्वमस्माकमागमनं स्वीकुरु।

अन्यच्च-

**वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो।**
**अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व।।**

**-ऋग्वेद: 7/54/2**

चन्द्रवदाह्लादकर, हे गृहाधिष्ठातृदेव! त्वमस्माकं गृहान्, धनधान्यादिकञ्च प्रवर्धय। वयन्ते सख्यं प्राप्नुमः। गौभि-रश्वादिभिश्च पशुभिः सह वयं जरारहिताः भवेम। पिता यथा पुत्रं पाति (रक्षति) तथैव त्वमस्मान् सपरिकरान् सपशूँश्च रक्ष।

तथा च -

**वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या।**
**पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः।।**

**-ऋग्वेद: 7/54/3**

हे गृहाधिष्ठातृदेव ! सुखकारिण्या, धनधान्यपूर्णयता तव संसदा सह वयं संगमनं कुर्मः। त्वं योगक्षेमपूर्वकमस्मान् रक्ष।

अन्यच्च -

**अमीवाहा वास्तोष्पते विश्वा रूपाण्याविशन्।**
**सखा सुशेव एधि नः।।** -ऋग्वेद: 7/55/1

हे देव ! त्वमरिष्टनाशकः असि। विश्वरूपपालकः असि। अतः गृहे प्रविशतामस्माकं सखा भव। अस्मान् ते सख्यं प्रदेहीति तात्पर्यम्।

एवं वास्तुपालको वास्तोष्पतिः गृहवासिनां सर्वविध-सुखसमृद्धये बहुशः प्रार्थितयो वैदिकर्षिभिः।

एतत्सुखसमृद्धिशालिनः गृहाः कीदृशाः स्युः कथञ्च निर्मिताः स्युरित्यत्र पुनरप्यथर्ववेदीयं शालासूक्तं समीक्षणीयतामर्हति पथप्रदर्शकत्वेन। निदर्शनरूपेणात्र केचन मन्त्राः समुद्ध्रियन्ते। यथा प्रथम एव मन्त्रस्तत्र प्राक् द्रष्टव्य :-

**उपमितां प्रतिमितामथे परिमितामुत।**
**शालाया विश्ववाराया नद्धानि वि चृतामसि।।**

**-अथर्ववेदः 9/3/1**

शालापदमत्र भवनवाचकमेव मन्तव्यम्। तस्याः शालायाः निर्माणं, भित्तिद्वारगवाक्षादीनां व्यवस्थापनन्तत्र कीदृशं स्यादिति मन्त्रेऽस्मिन् सम्यक् प्रतिपद्यते। अत्र विश्ववारायाः (सर्वतः द्वारवत्याः विवृतायाः वा) शालायाः (गृहस्य) उपमितां (उपमायुक्तामर्थात् प्रशस्ताम्) निर्मितिं प्रतिमितां (प्रतिमायोग्याम्) अर्थात् भित्तेः सम्मुखं भित्तिनिर्माणं, द्वारसम्मुखं द्वारं, गवाक्षसम्मुखं गवाक्षः, येन द्वारादिवेधो न भवेत् एतादृशीं समानमापयुक्तां, परिमितां (परिमाणयुक्ताम्) नद्धानि (सम्यग् बन्धनयुताम्) सम्यङ्मिलितया सम्मिश्रतिया निर्माणसामग्र्या विचृतामसि (सम्यग् घटितां) कुर्मः। अत्र परिमितायाः वातप्रकाशादि-सौविध्यार्थं सर्वतो विवृतद्वारगवाक्षादि-व्यवस्थापनवत्याः, द्वारवेधादिरहितायाः शालायाः प्राशस्त्यं सम्यक्तया प्रतिपादितं वर्तते।

गृहमध्ये ब्रह्मस्थानं विवृतं भवेत् येन गृहे शेवधीनां (निधीनां) सततागमनं भवेत्। अतः शेवधिभ्यः अवकाशप्रदानाय द्यां पृथिवीञ्चान्तरा वितते विवृते देशे भवननिर्माणं तत्र परिमाणयुक्तं विवृतब्रह्मस्थानञ्च कार्यमिति सङ्केतयति मन्त्रोऽयं, यत्रोक्तम्-

**अन्तरा द्यां च पृथिवीं च यद् व्यचस्तेन शाला प्रति गृह्णामि त इमाम्। यदन्तरिक्षं रजसो विमानं तत् कृण्वेऽहमुदरं शेवधिभ्यः। ते शालां प्रति गृह्णामि**

**तस्मै।। -अथर्ववेदः 9/3/15**

एवमेव तृणादिभिः छादितं तद् गृहं समुचित-परिमाणयुक्तं दृढस्तम्भेषु आश्रितं, गजपृष्ठायां हस्तिन्यां भूमौ निर्मितं स्यात्, तथा च तस्य निर्माणं विद्वद्भिः शिल्पिभिः सम्यक् परिमाप्य कृतं भवेत्। येन तद् गृहमैश्वर्ययुक्तं स्यादिति सङ्केतयति तत्रैव मन्त्रद्वयम्। तद्यथा-

**तृणैरावृता पलदान् वसाना रात्रीव शाला जगतो निवेशनी।**
**मिता पृथिव्यां तिष्ठसि हस्तिनीव पद्वती।।**
**-अथर्ववेदः 9/3/17**

तथा च-

**ब्रह्मणा शालां निमितां कविभिर्निमितां मताम्।**
**इन्द्राग्नी रक्षतां शालाममृतौ सौम्यं सदः।।**
**-अथर्ववेदः 9/3/19**

तत्र शालानिर्माणं कतिधा सम्भवतीति तन्मानचित्रं, प्रस्तौति मन्त्रोऽयम्-

**या द्विपक्षा चतुष्पक्षा षट्पक्षा या निमीयते।**
**अष्ट पक्षां दशपक्षां शालां मानस्य पत्नीमग्निगर्भ इवा शये।।**
**-अथर्ववेदः 9/3/21**

द्विपक्षा शाला- मध्ये एकः कक्षः पार्श्वयोः पूर्वपश्चिमयोरेकैकः कक्षः।

चतुष्पक्षा शाला - मध्ये एक चतुर्दिक्षु चैकेकः कक्षः।

षट्पक्षा शाला- मध्ये एकः बृहत्कक्षः, पूर्वपश्चिमयोर्द्वौ, उत्तरदक्षिणयोश्चैकैकः।

अष्टपक्षा शाला- मध्ये एकः, चतुर्दिक्षु च द्वौ द्वौ।

दशपक्षा शाला- मध्ये कक्षद्वयम्, चतुर्दिक्षु च द्वौ द्वौ।

वैदकर्षिः कथयति यत् एवं परिमाणयुक्तायां सुविज्ञैः शिल्पिभिः निर्मितायां शालायां यथोदरे जाठराग्निः वसति तद्वत् एवञ्च गर्भस्थशिशुवदहं सुरक्षितः वसामि।

इत्येवं सूक्तेऽस्मिन् वास्तुसिद्धान्तप्रतिपादनपुरस्सरं न केवलं शालानिर्माणविषयकाः विविधाः प्रयोगाः दृश्यन्ते, अपितु निर्मितियोग्यानां विविधसामग्रीणामप्युल्लेखः तत्र तत्र मन्त्रेषु समुपलभ्यते।

एवं परिमाणेन सुविज्ञैः कुशलैः शिल्पिभिर्निर्मितानि तानि गृहाणि कीदृशानि फलदायकानि भवन्तीति तत्रैवाथर्ववेदे सप्तमे काण्डे षष्टितमे सूक्ते सप्तभिर्मन्त्रैः 'रम्यं गृहम्' इति कृत्वा सम्यक्तया वर्णितमस्ति। तद्यथा-

**इमे गृहा मयोभुव ऊर्जस्वन्तः पयस्वन्तः।**
**पूर्णा वामेन तिष्ठन्तस्ते नो जानन्त्वायतः।।**
**येषामध्येति प्रवसन् येषु सौमनसो बहुः।**
**गृहानुप ह्वयामहे ते नो जानन्त्वायतः।।**
**उपाहूता भूरिधनाः सखायः स्वादुसंमुदः।**
**अक्षुध्या अतृष्या स्त गृहा मास्मद् बिभीतन।।**
**उपाहूता इह गाव उपहूता अजावयः।**
**अथो अन्नस्य कीलाल उपहूतो गृहेषु नः।।**
**सुनृतावन्तः सुभगा इरावन्तो हसामुदाः।**
**अतृष्या अक्षुध्या स्त गृहा मास्मद् बिभीतन।।**
**- अथर्ववेदः 7, 60, 2-7**

तादृशान्यस्मद् गृहाणि सुखैश्वर्यौजःप्रदानि स्युः। तत्रास्मद्गृहेषु सत्यमधुरसम्भाषणानि भवेयुः। तानि गृहाणि च सौभाग्यवन्ति, हासप्रमोदशालीनि, पिपासाबुभुक्षादि-विरहितानि निर्भयानि च सन्तु। अथ च विपुलधनधान्य-परिपूर्णानि, मित्रात्मीयबन्धुजनयुक्तानि, प्रसादपूर्णानि च स्युः। तत्रस्थाः जनाः सदा नीरोगाः तिष्ठन्तु। दुग्धघृतादिबहुलानि सौभाग्यकराणि च तानि गृहाणि भवन्तु। सर्वविधसमृद्धि-शालीन्यस्मद्-गृहाणि सन्त्विति तात्पर्यम्।

तदेवंविधेन विवेचनेन सम्यक्तया प्रतिपद्यते यत् स्थापत्यशास्त्रस्य मूलमपि वेद एव विद्यते। एतेन '**सर्वं वेदात् प्रसिद्ध्यति**' अपि च '**सर्वविद्याखनिः श्रुतिरिति** विद्वज्जनोक्तयः सर्वथा सार्थकतां भजन्ते।' दिङ्मात्र-मत्राथर्ववेदीयान् कतिपयान् स्थापत्यशास्त्रादिसिद्धान्तान् यथामति समालोचयितुं मामकीनोऽयमकिञ्चनप्रयास इति विरम्यते विस्तरेण।

पूर्वनिदेशकः - राजस्थानसंस्कृतशिक्षाविभागस्य
सहसम्पादकः - भारती-पत्रिकाया
''श्रीनिलयनम्'' ए-277, महेशनगरम्, जयपुरम्

व्यक्तित्वम्

# संस्कृतानुरागी कविः श्रीमदनूपसिंहः

❑ बद्रीप्रसादशर्मा

लोके सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा भाषा अस्ति। संस्कृतभाषायाः तदन्तर्गतस्य च विविधेषु वैशिष्ट्येषु एकम् असाधारणं वैशिष्ट्यं तस्य अखिल-भारतीयत्वमस्ति। अपरभाषासु एतद् वैशिष्ट्यं नास्ति। प्राचीनकालाद् भाषा इयं व्यवहारोपयोगिनी भाषा असीत्। भाषेयं देववाणी नाम्नाऽपि सम्बोध्यते। अस्माकं संस्कृतवाङ्मयेतिहासे प्राचीनकालतः प्रारभ्य इदानीं यावत् विविधप्रदेशवास्तव्यानां महाकवीनां दार्शनिकानां रचनाकाराणां भाष्यटीकादिकर्तृणां भूयांसि नामधेयानि लभ्यन्ते। आधुनिकसमये भिन्नभिन्नप्रदेशोद्भूतस्य संस्कृतवाङ्मयस्य बहवः प्रबन्धाः प्रकाशमागताः। तेषु शोधप्रबन्धेषु प्रदेशवासिनां प्रादेशिकसंसृष्टिरपि दृष्टिपथम् आयाति। यथा च तंजौरराज्योद्भवानां संस्कृतोपासकानां नामावल्यां बहूनि केरलीयानां, महाराष्ट्रीयाणां कर्णाटक-स्थानां च नामानि उपलभ्यन्ते। तथैव राजस्थानेऽपि भारतवर्षस्य विविधप्रदेशेभ्य आगत्य सरस्वती-समुपासकाः संस्कृतवाग्देव्याः शारदायाः सेवामकुर्वन्।

राजस्थानस्य वीरप्रसविन्या वसुन्धरायाः सौभाग्य-मस्ति यत् अत्र अनेके वीरपुरुषाः उत्पन्नाः अभवन्। प्राचीनकाले राजस्थानप्रान्तस्य प्राचीनं नाम राजपूताना इति आसीत्। कर्नलजेम्सटॉडमहोदयानुसारं मारवाड़प्रदेशे भगवदाराधनायाः एका विशिष्टा परम्परा आसीत्। मरुप्रदेशे भूपाः संगीतप्रियाः आसन्। जांगलप्रदेशे अपि बहवः नृपाः आसन्। तेषु बीकानेर-राज्यस्य संस्थापकः रावबीका तदनन्तरं राव जैतसी, राव लूणकरणः, महाराजा दलपतसिंहः, महाराजा सूरसिंह, महाराजा कर्णसिंह इत्यादयः आसन्। महाराज-कर्णसिंहस्य ज्येष्ठपुत्रः अनूपसिंहः आसीत्।

श्रीमदनूपसिंहस्य जन्म विक्रमसंवत् १६९५तमे वर्षे चैत्रशुक्ले पक्षे (ई.स. ११ मार्च १६३८) अभवत्। अस्य वंशोत्पत्तिः कविः गंगानन्दः कर्णभूषणाख्यग्रन्थे इत्थं प्रतिपादयति-

**कैलासाचलचारुभास्वरपृथुप्रासादपालिद्युतिः।**
**व्याजेनोपहसत्युपर्युपगतां सा राजधानीं हरेः।**
**तत्रास्ते धरणीपतिः पृथुयशाः श्रीकर्ण इत्याख्या।**
**गोविन्दाङ्घ्रियुगारविंदविलसच्चित्तालिरत्युन्नतः।।**
**राधेयभ्रममात्मनि त्रिजगतां चित्ते स्थिरीकुर्वता।**
**दीयन्तेऽर्थिगणाय येन सततं हेमाश्वहस्त्यादयः।।**
**आज्ञया तस्य भूपेन्द्रोर्न्यायकाव्यकलाविदः।**
**गंगानन्दकवीन्द्रेण क्रियते कर्णभूषणम्।।**

महाराजकर्णसिंहस्य शासने एव मुगलसम्राट् औरंगजेबः बीकानेरप्रान्तस्य प्रभारम् अनूपसिंहाय दत्तवान्। वि. संवत् १७२६ तमे वर्षे कर्णसिंहस्य मरणोपरान्तम् अनूपसिंह एव राजपदमारूढः[3] तदनतरं बादशाहादेशानुसारम् अनूपसिंहः युद्धाय दक्षिणं प्रेषितः।

विक्रम संवत् १७३४ तमे वर्षे अनूपसिंह ओरंगाबाद प्रदेशस्य शासकः नियुक्तः अभवत्। गैजेटियर आफ दि बीकानेर स्टेट ''इति पुस्तके लिखितं यत् १७३५ तमे वर्षे अनूपसिंहः भाटीशासकान् जित्वा तत्र अनूपगढ इति नगरस्य निर्माणमकरोत्।''

1. बीकानेरराज्यस्य इतिहासलेखकः रायबहादुरगौरीशंकर हीराचन्द ओझा

2. कर्णभूषणम्- राजकीयग्रन्थालयः बीकानेरम्

3. दयालदास की ख्यात - प्राच्यविद्याप्रतिष्ठानम् जोधुपरम्

अनूपसिंहस्य विवाहः कुमारावस्थायां वि.सं. १७०९ तमे वर्षे फाल्गुनकृष्णपक्षे उदयपुरनगरस्य महाराज राजसिंहस्य भगिन्या सह अभवत्[1]। राजप्रशस्ति महाकाव्ये अनूपसिंहस्य विवाहविषये लिखितम् यत्–

**शते सप्तदशे पूर्णे नवाख्येऽब्देऽकरोत्तुलां।**
**रूप्यस्य चक्रे या फाल्गुने कृष्णपक्षके।।**
**............... एकसप्ततिसंमिता।।**[2]

**कृतित्वम्-**

श्रीमन्नृपतिः अनूपसिंहः प्रखरः राजनीतिज्ञः विद्याप्रेमी च आसीत्। बीकानेरप्रान्तस्य सांस्कृतिक-परम्परायां अनूपसिंहस्य अनुपमयोगदानं वर्तते। यादृशः अनूपसिंहः कर्मठवीरः आसीत् तादृशः तस्य ज्ञानं संस्कृतभाषायामासीत्। विद्वज्जनानां सम्मानकर्ता तेषामाश्रयदाता अपि आसीत्। अनूपसिंहस्य रचनाः संस्कृतसाहित्यस्य विभिन्नक्षेत्रेषु विभक्ता आसन्। यथा श्राद्धप्रयोगचिन्तामणिः गीतगोविन्दस्य अनुपमोदयः कामशास्त्रे कामप्रबोधः तंत्रशास्त्रे अनूपविवेकम्। वैद्यनाथसूरिकृते ज्योत्पत्तिसारे ज्योतिषग्रन्थे उल्लेखः प्राप्यते यथा–

**नत्वा श्रीमदनूपसिंहनृपते राज्ञावशाददद्भुतम्।**
**वक्ष्ये शेषविशेषयुक्तिसहितं ज्योत्पत्तिसारं परम्।।**

श्रीगंगारामस्य सुतः मणिरामदीक्षितः तद् विरचिते अनूपव्यवहारसागरे उक्तम्–

**कुर्व्वे श्रीमदनूपसिंहवचनात् स्पष्टार्थसंसूचकम्।**
**चक्रोद्धारमहं मुहूर्त्तविषये विद्वज्जनानां मुदे।।**

भद्ररामस्य अयुतलक्षहोमकोटिप्रयोगः धर्माम्बुधिः अनन्तभट्टस्य तीर्थरत्नाकरः श्वेताम्बरः उदयचन्द्रस्य पाण्डित्यदर्पणं नाम ग्रन्थानाम् उल्लेखः ग्रन्थागारे प्राप्यते। अनूपसिंहस्य राजस्थानी भाषायामत्यन्तोत्साहः आसीत्। बीकानेरसंग्रहालये महाराजअनूपिसंहस्य विषये राजस्थानीभाषायां टेसिटोरी महोदयेन उक्तम्–

**'करि प्रणाम श्रीसारदा अपणी बुद्धि प्रमाण।**
**सुकसारिक वार्त्ता करू द्यो मुझ अक्षर ज्ञान।।**
**विक्रमपुर सुहामणो सुख सम्पति की ठौर।**
**हिदूंस्थान हींदूधरम अैसौ सहर न और।।**
**तिहा तपै राजा करण जंगल कौ पतिसाह।**
**ताको कुंवर अनोपसिंह दाता सूर दुबाह।।**[1]

महाराजअनूपसिंहस्य आश्रयत्वे ये कवयः आसन् तेषु चारण, गाडण, वीरभाणप्रभृतयः आसन्। ठाकुरसीओत् कविना वेलियागीतेषु ''राजकुमार अनोपसिंह री वेल'' इति रचना कृता। अस्यां रचनायाम् एकचत्वारिंशत् पद्यानि सन्ति इयं रचना सहृदयहृदया-नन्दम् उत्पादयति–

**''बीकानेर सुहावणो दिन दिन चढतौ दौर**[2]**।**
**हिन्दूस्थान मृजाद हद् नव कोटि सिरमौर।।**
**राज करै राजा तिहां कमधज भूप अनूप।**
**सकबंधी करणोससुत राठौड़ा कुल रूप।।''**

श्रीमदनूपसिंहः संगीतप्रेमी अपि आसीत्। प्रसिद्धः संगीताचार्यः जनार्दनभट्टस्य पुत्रः भावभट्टः (संगीतराय) अनूपसिंहस्य राजसभायां संगीतानूपांकुश, अनूपसंगीत-विलास, अनूपसंगीतरत्नाकर टीकाः रचितवान् यथोक्तम् संगीतानूपांकुशे –

1. गजेटियर ऑव दि बीकानेर स्टेट पृ-४२
2. राजप्रशस्तिमहाकाव्ये

1. राजस्थानी भाषा साहित्य
2. टैसिटोरी ए डिस्क्रिप्टिव कैलेलाग आन् बार्दिक मैनुस्किप्ट्स परि २ पृ. ५६

**स्तोकं मुद्रामुरीकृत्य सार्धवर्षत्रयात्मिका[1]।**
**श्रीमदनूपसिंहस्याज्ञया ग्रंथद्वयं कृतम्।।**
**एकोऽनूपविलासाख्यो भूपरत्नाकरे परः।**
**अनूपांकुश नामायं ग्रन्थो निष्पाद्यतेऽधुना।।**

मुंशीदेवीप्रसादः महाराजाश्रीमदनूपसिंह-रचितग्रन्थानाम् उल्लेखं कृतवान्।

सन्तानकल्पलता (वैद्यकीयं) चिकित्साभाती-माला (वैद्यकीयं) संग्रहरत्नमाला (वैद्यकीयं) लक्ष्मीनारायणस्तोत्रम्, लक्ष्मीनारायणपूजासारः (छन्दोबद्धवैष्णवपूजा), साम्बसदाशिवस्तुतिः (शिवपूजा), कौतुकसारोद्धारः (राजविनोदः), संस्कृतभाषाकौतुकम्, अनूपरत्नाकरः (ज्योतिषं) अनूपमहोदधिः (ज्योतिषं) संगीतवर्तमानः (संगीतं) संगीतानूपरागः (संगीतं) श्राद्धप्रयोगचिन्तामणिः (धर्मशास्त्रं)।

अनूपसिंहस्य आश्रये रचिताः ग्रन्थाः धर्मशास्त्रम् (रामभट्टकृतं) अनूपमेघः (रामभट्टकृतः) संगीतविनोदः (भावभट्टकृतः) अनूपकौतुकार्णवम् (रामभट्टकृतं) यन्त्रकल्पद्रुमम् (विद्यानाथकृतं) माधवीयकारिका[2] (शाम्बभट्टकृता) कामप्रबोधराजधर्मः (जनार्दनकृतः) सन्ति।

**व. अध्यापकः (संस्कृतम्)**
**ब्यावर, जिला-अजमेर (राज.)**

1. गंगतानूपाकुंशे- १५
2. दयालदास री ख्यात पृ ५८

## पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्

**पत्रकम् 4 (नियम : 8)**

| | | |
|---|---|---|
| 1. | प्रकाशनस्थानम् | - जयपुरम् |
| 2. | प्रकाशने कालावधिः | - मासिकपत्रम् |
| 3. | मुद्रकस्य नाम | - द्वारा - न्यू जय शिवा प्रिन्टर्स |
| | नागरिकता, संकेतः | - भारतीयः, गोपालबाड़ी, जयपुरम् |
| 4. | प्रकाशकस्य नाम | - माणकचन्दमाहेश्वरी |
| | नागरिकता, संकेतः | - भारतीयः भारतीभवनम्, बी-15, न्यूकॉलोनी, जयपुरम्। |
| 5. | सम्पादकस्य नाम | - श्रीप्यारेमोहनशर्मा |
| | नागरिकता, संकेतः | - भारतीयः, भारतीभवनम्, बी-15, न्यूकॉलोनी, जयपुरम्। |
| 6. | पत्रस्य संपत्तेः अधिकारस्यांशभाजां वा जानानां संस्थाया वा नाम संकेतः | - ''भारतीय-संस्कृत-प्रचार-संस्थान राजस्थान जयपुर'' |

अहं माणकचन्द माहेश्वरी घोषयामि यत् उपरि लिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति।

**दिनांकः 01-03-2016**

❑ म.म. देवर्षिकलानाथशास्त्री

# पुस्तकसमीक्षा

## वैष्णवभक्तिस्तोत्रसंग्रहः

वैष्णवभक्तिधाराप्रवर्तकेषु प्रमुखाचार्येषु पुष्टिमार्ग-प्रवर्तकानां श्रीमद्वल्लभाचार्याणां कृतित्वं सुविदितमेव देशे। ते खलु सम्प्रदायानुयायिभिः 'महाप्रभु' संज्ञयाऽभिधीयन्ते। तेषामात्मजाः श्रीविट्ठलनाथाचार्या अपि भक्तिधारापोषका उद्भटाः विद्वांसः कवयश्चाऽभूवन् ये ''प्रभुचरण'' संज्ञयाऽभिधीयन्ते। तेषां सारस्वतरचनासमुदायः सुविपुलो यस्मिन् शास्त्र-विवेचका ग्रन्था अपि भूयांसः सन्ति, सुललित-काव्यरचना अपि। पुष्टिमार्गपरम्परायां श्रीकृष्णस्य प्रेमपात्रेषु श्रीयनुमायाः प्राधान्यमस्ति, सा हृदयस्वामिनी वर्तते, वैष्णवानामपि स्वामिनी। किन्तु श्रीराधाया अपि महत्त्वं श्रीवल्लभसम्प्रदाये मान्यते। श्रीविट्ठलनाथाचार्यैः श्रीराधायाः स्तवनमपि ''स्वामिनीत्यादि सम्बोधनैः'' कृतमस्ति। एवंविधानि सुललितानि बहूनि स्तोत्राणि तद्वंशजैः सकलशास्त्रविचक्षणैः श्रीश्याममनोहरा-चार्यैरन्वेष्य प्रकाशितानीति सूचितचरमस्माभिः।

तस्यामेव परम्परायां सुमधुरो विशालश्चैकोऽपरः स्तोत्रसंग्रहः, सपद्येव तैः साधु सम्पाद्य प्राकाश्यमानायितो यस्मिन् श्रीराधास्तोत्राणि विविधभावाभिव्यक्ति-संवलितानि सवृत्तिकानि सङ्कलितानि सन्ति। ''श्रीमत्प्रभुचरणकृताः स्तोत्रविज्ञप्तयः'' इति शीर्षकवहेऽस्मिन् संग्रहे शिखरिणीभुजंगप्रयात-आर्याप्रभृतिच्छन्दःसु गुम्फितानि सुललितानि स्वामिन्यष्टकादीन्यपि सन्ति।

आराध्यस्य भक्तिभावसंवलितानि ''ललिता-त्रिभङ्गीस्तोत्रम्'' इत्यादिशीर्षकवहानि माधुर्य-व्यंजकस्तोत्राण्यपि सन्ति, गोकुलमाहात्म्यव्यञ्जकानि ''गोकुलाष्टक'' प्रभृतिस्तोत्राण्यपि। उल्लेखनीयोऽयमेषां विशेषो यदेषां सुविस्तृताः शास्त्रव्याख्या समंजनपराः प्रौढसंस्कृतनिबद्धा विवृतयोऽपि परवर्तिभिराचार्यै-र्विद्वद्भिर्वा व्यलेखिषत। श्रीश्याममनोहराचार्यैः कतिपयेषां विवृतिः स्वयं विलिखिता, हिन्द्यनुवादः कतिपयेषां स्वयं प्रणीतोऽत्र प्रकाशितः। एतदतिरिक्तं श्रीविठ्ठलेशैर्विरचिता भक्तिभावसंवलिताः प्रार्थना अपि संगृहीता येषामभिधानं ''विज्ञप्तिः'' इति क्रियते सम्प्रदाये।

एवंविधानां स्तोत्ररत्नानां प्रौढ-प्राञ्जल-सुललित-संस्कृतकाव्यशैलीबद्धोऽयं संग्रहो हृदयावर्जकः प्रेरकः, सर्वविधानां पाठकानामुपकारी च स्यादित्येतस्य संग्राहकाः, सम्पादकाः, व्याख्याकाराश्च श्री श्याम-मनोहराचार्याः प्रणतिपूर्वकं शतशो वर्धापन-वाग्भिरलं-क्रियन्ते भारतीपरिवारेण।

**''श्रीमत्प्रभुचरणकृताः स्तोत्रविज्ञप्तयः''** संकलनकर्ता श्रीश्याममनोहराचार्यः प्रकाशकः श्रीवल्लभविद्यापीठ श्रीवल्लभेशप्रभुचरणाश्रम ट्रस्ट, वैभव कोआपरेटिव सोसाइटी, पूना बेंगलोर रोड, कोल्हापुर, पृ.सं. 310, निःशुल्कवितरणार्थम्।

### नूतनवर्षपञ्चाङ्गप्रकाशनम्

चैत्रे मासि शुक्लप्रतिपद्यस्माकं वैक्रमो वर्षः प्रारभ्यते। तदारभ्य सौर-चान्द्र-नाक्षत्रकालगणना-नुसारमस्माकं श्रावणी-जन्माष्टमी-दीपावली-होलिका-प्रभृतयः सर्वे उत्सवाः संमान्यन्ते। गणनाया अस्याः

सर्वथा वैज्ञानिकपद्धत्या यथार्थविवरणमस्मिन् देशे-शताब्दीभ्य: ''पञ्चाङ्गेषु'' प्रकाश्यते येषु ग्रहचार-विवरणं, मुहूर्तनिर्धारणं, सूर्योदयलग्नसूचना, सौर-चान्द्रग्रहणादिविवेचनं सविस्तरं प्रस्तूयते। एभि: पञ्चाङ्गैरेव भारतीयसंस्कृतेर्लोकजीवनं शताब्दीभ्य: सञ्चाल्यते। एवंविधानां पञ्चाङ्गानां सुदीर्घा सुविशाला च परम्परा देशस्य विविधेष्वञ्चलेषु जागर्ति। जयपुरं हि ज्योतिर्विज्ञाननगरीति सुप्रथितं यतोऽस्या: संस्थापकेन राजाधिराज सवाईजयसिंहेन समस्तेऽपि देशे यन्त्रशाला वेधशालाश्च संस्थापिता अभूवन्। दिल्ल्यां जन्तरमन्तर-नाम्नी वेधशाला, जयपुरीया यन्त्रशाला चाद्यापि द्रष्टुं शक्येते। जयपुराद् विभिन्नैर्ज्योतिर्विज्ञानविशारदै: पञ्चाङ्गानि प्रकाश्यन्ते स्म।

पं. केवलरामज्योतिषी, पं. नारायणज्योतिषी-प्रभृतिनिर्मितानि पञ्चाङ्गानि जयपुरेऽनुस्रियन्ते स्म। अन्येऽपि शास्त्रविचक्षणा: ज्योतिर्विज्ञानिन: पञ्चाङ्गानि प्रकाशयन्तिस्म। साम्प्रतमप्यनेकानि पञ्चाङ्गानि विज्ञानविचक्षणैर्ज्योतिर्विद्भि: समस्तयान्त्रिकसूचनाभि: सह जयपुरात् प्रकाश्यन्त इति सूचयन्त: प्रमोदामहे।

जयविनोदीपञ्चाङ्ग-सम्राट्पञ्चाङ्ग-जयमार्तण्ड-पञ्चाङ्गेत्यादिनामभि: प्रकाशितानां पञ्चाङ्गानामादर: सर्वत्र क्रियते। सम्राट्पञ्चाङ्गं पं. चन्द्रशेखरशर्मणा तत्सुतेन डॉ. रविशर्मणा च प्रत्यब्दं प्रकाश्यते। सपद्येव प्रवर्तिष्यमाणस्य वि. 2073 वर्षस्य पञ्चाङ्गं दृष्टमस्माभि:। पं. दामोदरशर्मणो जयमार्तण्डपञ्चाङ्गमपि प्रकाश्यते।

पंचकूला (हरियाणा) त: स्व पं. मुकुन्दवल्लभमिश्र-ज्योतिर्विदा प्रवर्तितं पञ्चाङ्गं तु प्रत्यब्दं विविधवैज्ञानिक-सूचनाभि: शास्त्रीयविवेचनैश्च विभूषितं विविधशास्त्र-विचक्षणेन जयपुराल्लब्धसारस्वतषीयूषेण विद्वद्वर्येण पं. प्रियव्रतशर्मणा तत्सहयोगिभिश्च सम्पादितं नियतरूपेण लभ्यते भारतीपरिवारेण। पं. प्रियव्रतशर्मणा ''मुहूर्तगजानन'' प्रभृतयो ज्यौतिष-धर्मशास्त्रादिग्रन्था अपि प्रणीता:, प्रकाशिताश्च सन्ति। व्रतपर्वविवेकप्रभृतयो ग्रन्था: अपि सुप्रथिता:। अभिजित् प्रकाशन, सेक्टर-6, पंचकूला हरियाणात: प्रकाशनप्रक्रिया नियमितरूपेण प्रचलति। काशीत: (हिन्दूविश्वविद्यालयादीनां) लखनऊत: (जगन्नाथपञ्चाङ्गम्) अन्येभ्यश्च नगरेभ्य: प्रकाश्यमानै: पञ्चाङ्गैर्भारतीयसंस्कृतेरजरामरता प्रमाण्यत इति सुमहत: प्रमोदस्य विषय:।

**आत्मस्वरूपविमर्श:**

शास्त्रविचक्षणानां जैनसूरीश्वराणां संस्कृतनिबद्धा: शास्त्रीयग्रन्था विविधप्रकाशनोपक्रमसंचालनपराभि: संस्थाभिर्गुर्जरप्रान्तात् प्रकाश्यमाना: सन्तीति विदन्त्येव विद्वांस:। शासनसम्राट्शताब्दीग्रन्थमाला तादृश्येवैका-ग्रन्थमालाऽस्ति। अस्यां हि पूर्वतोऽप्रकाशिता ग्रन्था अपि प्रकाश्यन्ते, प्रकाशितचरा: किन्तु साम्प्रतमनुपलब्धा ग्रन्था अपि। (शासनसम्राट्पदं जैनसमाजे धर्मस्य सर्वोच्च-पीठाधीशानां मण्डलेश्वराणां च कृते प्रयुज्यत इत्यपि विदन्त्येव सुधिय:।) एवंविध एको ग्रन्थ: (6 पुष्प) वृत्तिसहिता ''अध्यात्मोपनिषद्'' वर्तते या हि न्यायशास्त्रविचक्षणेन महोपाध्याय श्रीयशोविजयगणिना प्रणीताऽभूत् (अधिकारचतुष्टये, पद्येषु), यस्या वृत्तिश्च गद्यै: शासनसम्राट्विजयनेमिसूरीश्वरैर्लिखिताऽभूत्। अत्र हि विद्या, अविद्या, ज्ञानं, कर्म, समाधि:, बुद्धि:, योग:, क्रिया इत्यादिविषयाणां विवेचनम् आत्म (ब्रह्म) स्वरूपस्य परिज्ञानाय तर्कशास्त्रीयदृशा विहितमस्ति। शास्त्रयोगशुद्धि: ज्ञानयोगशुद्धि:, क्रियायोगशुद्धि:, साम्ययोगशुद्धिरित्यभिहितेऽधिकारचतुष्टये विद्वत्प्रवरेण

यशोविजयगणिना शास्त्रविधिपूर्वकं यत्प्रकरणं निर्मितं तस्य पूर्ववर्तिनोऽधिकारत्रयस्य पद्यबद्धा वृत्तिर्विजयनेमिसूरीश्वरैर्विलिखिता (साम्ययोगशुद्धिनामाऽधि-कारस्य वृत्तिर्नोपलब्धा) अत्र प्रकाशिताऽस्ति। समग्रस्यास्य ग्रन्थस्य सम्यक् संशोधनादिपूर्वकं सम्पादनं श्रीविजयशीलचन्द्रसूरिशिष्येण श्रीत्रैलोक्यमण्डन-विजयेन कृतं, खंभातस्थया प्रकाशनसमित्या च प्रकाशनं विहितमिति सुमहान् सन्तोषः।

एषु दिवसेषु यदा संस्कृतस्य प्रौढं परिज्ञानं विरलायते, विशुद्धं लेखनं, सर्वथा शुद्धं मुद्रणं च प्रायशो न परिदृश्यते प्रकाशनेषु, तदा प्रौढशास्त्रविवेचकाः सर्वथा शुद्धेन मुद्रणेन विद्वत्प्रसादका एवंविधा ग्रन्थाः सर्वात्मना संस्कृतसेवकान् प्रमोदयेयुरिति भूयस्तरामभिनन्दनीया एतादृशाः, प्रकाशनोपक्रमाः।

**अध्यात्मोपनिषत्प्रकरणम्** (सवृत्ति) प्रणेता यशोविजयगणी, वृत्तिकारः विजयनेमिसूरिः, सम्पा.- त्रैलोक्यमण्डनविजयः प्रका. श्रीजैनग्रन्थप्रकाशन-समितिः, खंभात, पृ. 116-मू. 160/- प्राप्तिस्थानम् (1) सरस्वतीपुस्तकभंडार, 112 हाथीखाना, रतनपोल, अहमदाबाद (2) विजयनेमिसूरिस्वाध्यायमन्दिर 12 भगतबाग सोसाइटी, नवा शारदामन्दिर रोड, पालडी, अहमदाबाद।

---

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.- 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम.................................पुत्र/पुत्री श्री...........................भवन संख्या..........**

**गली/ मोहल्ला/कॉलोनी................................वाया/पोस्ट ऑफिस........................**

**तहसील..............................जिला.......................राज्य.........................**

**देश..................पिन.....................................दूरभाष...........................**

**मोबाईल नं...........................ईमेल.................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**

**भारती संस्कृत मास पत्रिका**

**बी-15, भारती भवन, न्यू कॉलोनी, जयपुर-302001 (राज.) दूरभाष-2379014**

ई-मेल - sanskritbharti09@gmail.com

# संस्कृतसमाचाराः

### उपबृंहितः शाकुन्तलपाठः

अजरामरः खलु मूर्धन्यविश्वकवेः कालिदासस्य महिमा, अपूर्वश्च गरिमा तल्लिखितस्य नाटकस्याऽभिज्ञानशाकुन्तलाख्यस्य। सहस्राब्दीद्वयं व्यतीतं किन्तु चिरयूनः शाकुन्तलस्य महिम्नि किञ्चन वैपुल्यं प्रत्यब्दं वर्धमानं श्रूयत एव। अस्मिन् वर्षे तदिदं ज्ञात्वा परमः प्रमोदोऽन्वभावि यन्नाटकस्यास्य पाण्डुलिपि-शोधोऽद्यापि प्रवर्तते, नूत्नाः पाठाश्चानुसन्धीयन्ते। कालिदासपाण्डुलिपिशोधस्य सुदीर्घ इतिहास इति तु विदन्त्येव विपश्चितः। बेल्जियमदेशीयेन शार्पे-विद्वद्वरेण ''कालिदासलेक्सिकोन'' प्रकाशितोऽभूत्। तदनु स्मिथ-मेकडानल्ड, कीथ, भाण्डारकर, हार्नली, फर्गुसन, रेवाप्रसादद्विवेदिप्रभृतिभिः कालिदासीयग्रन्थाधारितं सुबहु लेखनं, सम्पादनं, ग्रन्थावलीप्रकाशनादि चाक्रियत। मल्लिनाथादिटीकाकृद्भिः शाकुन्तलादिग्रन्थानां विमर्शो ब्राह्मी लिपिलिखितपाण्डुलिप्याधारेण कृतोऽभूदित्यपि सुप्रथितम्। कालिदाससदृशस्यामरकवेर्ग्रन्था अन्यास्वपि लिपिषु लिपीकृताः, स्युरेवेत्यापि सर्वेऽभिप्रयन्ति स्म। नागरीलिपि-लिखिताः ग्रन्था अपि सन्त्येव।

सपद्येव वृत्तमिदमधिगतं यत् शारदालिपिलिखिताः शाकुन्तलपाण्डुलिपयोऽप्यधिगताः। गुजरातविश्वविद्यालये संस्कृतविभागाध्यक्षेण डॉ. वसन्तकुमारभट्टवर्येण शारदालिपिकृतशाकुन्तले नूतनाः पाठाः अद्यावध्यनुपलब्धानि दृश्यान्यप्यधिगतानि। तदाधारेण नूतनं संस्करणं शाकुन्तलस्य प्रणीतमस्ति, यस्य भूमिकायां शोधयात्राया इतिहासोऽप्यस्ति, मूले विवृद्धाः पाठा अपि सन्ति। काश्मीरेषु प्रसृतायां शारदायां समुपलब्धोऽयं समृद्धः पाठो नूत्ना दिशः प्रकाशयिष्यतीति स्पष्टमेव। प्रो. वसन्तकुमारभट्टेन फरवरीमासप्रारम्भे जयपुरे समागतेन सूचितं यदस्य सम्पादितस्य शाकुन्तलनाटकस्य मुद्रणीया पाण्डुलिपि दिल्लीस्थाय राष्ट्रियसंस्कृतसंस्थानाय प्रस्तुताऽस्ति, तदिदमाशास्यते यच्छीघ्रमेव प्रकाशनमस्य कालजयि-नाटकस्य स्यात्। एवंविधानि वृत्तानि हृदयावर्जकानि भवन्तीति चिन्तयन्तोऽत्र सर्वं वृत्तं पाठकेभ्यः प्रस्तुमो वयम्।

### वैष्णवभक्तिसमायोजनम्

वैष्णवभक्तिधाराप्रवर्तकेषु प्रमुखाचार्येषु निम्बार्काचार्याणां प्रधानपीठं राजस्थाने सलेमाबादाख्ये नगरे (अजमेर-किशनगढ़समीपे) विराजते यस्य प्रधानाचार्याः पीठाधीशाः संस्कृत-ब्रजभाषादिधुरन्धराः सुकवयः श्रीराधासर्वेश्वरशरण देवाचार्याः (भारतीसंरक्षकाः) सन्तीति विदन्त्येव सुधियः। तर्हि माघकृष्णदशम्यां (3 फरवरी दिनाङ्के) पूर्वपीठाधीशानां श्रीगोपीश्वरशरणदेवाचार्याणां पट्टारोहणोत्सवः समायोज्यत यस्मिन् श्रीगोपीश्वरशरणदेवाचार्याणां स्तुतौ समर्पितं पुस्कमेकं लोकाय समर्प्यत यस्मिन् श्रीराधासर्वेश्वरशरणदेवाचार्य-प्रणीता ''श्रीगोपीश्वरशरणदेवाचार्यदशश्लोकी'' मुद्रिताऽस्ति, शास्त्रार्थविवरणमप्येकं मुद्रितमास्ते यस्मिन् शैव-वैष्णवयोः सिद्धान्तविवरणस्पर्धामूलकाः शैवैः प्रहिताः 64 प्रश्ना वैष्णवसिद्धान्तदृशा श्रीगोपीश्वरशरणदेवाचार्यैः समाहिता अभूवन्। ऊनविंश्यां शताब्द्यां निम्बार्कपीठाधीशैरेभिः जयपुर-निवासः जयपुरनगर्यामागमनं च परित्यक्तमभूद् यतस्तदानीन्तनो जयपुरनरेशः श्रीरामसिंहः (द्वितीयः) शैवमतसमर्थकः सम्पन्नोऽभूत्, तदनुयायिनश्च शैवमत-मङ्गीकर्तुं सर्वान् बलात् प्रेरयन्ति स्म। तदनु सलेमाबादाख्ये निम्बार्कतीर्थ एव न्यवसन् सर्वे आचार्याः।

सर्वस्यास्य वृत्तस्य विवरणं समारोहेऽस्मिन् प्रादीयत। राजस्थानस्य शिक्षाराज्यमन्त्री श्रीवासुदेवदेवनानी, अन्ये जननेतारः भारतीप्रधानसम्पादको देवर्षिकलानाथशास्त्री, शास्त्रीकोसलेन्द्रदास इत्यादय उत्सवेऽस्मिन् समवायन्त। युवाचार्याः श्रीश्यामशरणदेवाचार्या अपि सर्वान् समबोधयन् भारतीप्रधानसम्पादको देवर्षिकलानाथशास्त्री, मन्त्रिमहोदयः श्री देवनानी, ग्रन्थप्रणेतारो राष्ट्रपतिसम्मानिता भारतीसंरक्षकाः पीठाधीश्वराः श्रीराधासर्वेश्वरशरणदेवाचार्या अपि प्रावोचन्त।

प्रधानसम्पादकः

प्रेरकप्रसङ्गशतकम्

# षट्त्रिंशः प्रसङ्गः-श्रेष्ठगुणाः वारं वारं सुफलं वितरन्ति।

❑ श्रीमती आराधना धर्माधिकारी

ब्रिटेननगरे फ्लोमिंगनामा कृषकः प्रतिवसति स्म। एकस्मिन् दिने सः स्वक्षेत्रे कार्यं कुर्वन्नासीत्, सहसा तेन कस्याप्याक्रन्दनध्वनिः श्रुताः, तस्यां दिशि प्रधाव्य चावलोकितं यदेको बालकः पङ्के मग्नो जायमान आसीत्। त्वरितमेव तेन वृक्षस्यैका दीर्घतमा शाखा उच्छिन्ना। तदाश्रयेण च बालको निस्तारितः।

अग्रिमे दिने तस्य कृषकस्य गृहसम्मुखे अश्वरथः एक आगत्यावरुद्धः। तस्मिन् स्थितेन धनिकेन कथितम्- अहं तस्य बालकस्य पिता अस्मि यं त्वं ह्यः अरक्षयः तस्य च प्रत्युपकारं कर्त्तुमिच्छामि। परं कृषकः प्रत्युपकारे किमपि गृहीतुं नोद्यतः। अस्मिन्नेवान्तराले कृषकपुत्रो बहिरागतः। तमवलोक्यैव धनिकस्य मनसि विचारः समागतः। तेन कथितम् अहं तव बालकं स्वपुत्रा वत्पालयितुमिच्छामि। तस्मै अपि ताः समस्ताः सुविधाः प्राप्स्यन्ति उच्चशिक्षा च प्राप्स्यति याभिः स महापुरुषः स्यात्। बालकस्य भविष्यं विचिन्त्य सः स्वीचकार।

अनन्तरं स कृषकपुत्रः लन्दनराज्ये प्रतिष्ठितात् सेन्ट मेरिज़् चिकित्सामहाविद्यालयात्स्नातको अभवत्। विश्वस्मिंश्च महान् वैज्ञानिकः पेनेस्लिनौषधस्याविष्कारकः ''सरअलेकजेण्डर फ्लोमिंग'' नाम्ना प्रसिद्धः समभवत्।

कथेयमत्रैव न समाप्ता भवति। कतिपयवर्षानन्तरं तस्य धनिकस्य पुत्रः गंभीररूपेणास्वस्थोऽभवत् तदा च तस्य रक्षा पेनेस्लिनौषधेनैवाभवत्। तस्य धनिकस्य नाम रैडाल्फ चर्चिल इति तत्पुत्रस्य च विंस्टल चर्चिल इत्यासीत्। यः वारद्वयं ब्रिटेनराज्यस्य प्रधानमंत्री बभूव। यस्य राज्ये न कदापि सूर्यास्तो भवतिस्म।

218, धर्माधिकारीभवनं, ब्रह्मपुरी, जयपुरम्

## पूज्यबाबामहोदयानामान्दोलनकारिस्वरूपम्

❑ वेणीमाधव गो. धर्माधिकारी

समाजसेवायाः विभिन्नेषु क्षेत्रेषु सावधानतापूर्वं कार्यकरणस्य गुणः बाबामहोदये आसीत्। घटना 1928 तमस्य वर्षस्यास्ति। तस्मिन् समये संघस्य प्रारम्भः संजात आसीत्। संघस्य स्वयंसेवकास्तदा आयोजितेषु गणेशोत्सवेषु सहकार्यं कुर्वन्ति स्म। एवं तु अस्य वर्षस्य गणेशोत्सवात्पूर्वकमेवान्दोलनमभूत्। आन्दोलनमेतदर्थमेवासीद् यद् गणेशोत्सवे समाजस्यास्पृश्यबन्धूनामपि प्रवेशो भवेत्। सीताबर्डीवसतौ सार्वजनिकोत्सवमण्डलद्वारा भिडेकन्यापाठशालायामुत्सवानामायोजनं भवतिस्म। बाबामहोदयैरस्पृश्यबन्धूनां प्रवेशार्थं वार्ता प्रारब्धा। मार्ग एवं निर्णीतः यदुत्सवमण्डलस्यैकमधिवेशनमाहूतं स्यात् तस्मिंश्चैतादृशः प्रस्तावः पारितो भवेद् यदुत्सवेषु समाजस्यास्पृश्यबन्धूनामपि प्रवेशोऽनुमतः स्यात्। एवं निर्णीतम् एतदावश्यकमभूद् यदधिवेशने अधिकाधिका संख्या तेषां स्याद्ये प्रस्तावस्य समर्थकाः। बाबामहोदयाः एतदर्थं पूर्णतया संलग्ना अभूवन् तेषां प्रेरणया असंख्या नवयुवकाः उत्सवमण्डलस्य सदस्या अभवन्। महता बहुमतेन प्रस्तावः पारितः। उत्सवे चास्पृश्यबन्धूनामपि प्रवेशः सोत्साहमभवत्।

218, धर्माधिकारीभवनं, ब्रह्मपुरी, जयपुरम्

# विंश-शताब्द्याः राजस्थानस्य नाट्यपरम्परा

❑ पवनकुमारशर्मा

राजस्थानीयेषु विद्वत्सु 'शिशुपालवधम्' इत्यस्य महाकाव्यस्य प्रणेता महाकविमाघः अस्यामेव राजस्थानीयपवित्रधरायां जालौरमण्डलान्तर्गते भीनमालस्थाने जनिं लेभे। तेन भक्ति-नीति-राजनीतिक्षेत्रे स्वविचारैः समाजः-संस्कृतसाहित्यञ्च उपकृतम्। येषां कृते सूक्तिरियं प्रसिद्धा एव-

**''उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।''**

इत्थं ततः समारभ्य परम्परेयं अम्बिकादत्तव्यासः, श्रीगिरधरशर्माणः, श्रीकृष्णभट्टः कविकलानिधिः जनार्दनभट्टः, भट्टमथुरानाथशास्त्री, गिरिधरशर्मा चतुर्वेदी, सूर्यनारायणशास्त्री, नारायणशास्त्रीकांकरः, डॉ. हरिरामाचार्यः, डॉ. मोहनलाल-पाण्डेयः, डॉ. कलानाथशास्त्रीत्यादिभिः विद्वद्वृन्दैः निरन्तरं परिपालिता-परिपोषिता चास्ति। राजस्थानस्य विभिन्नक्षेत्रेभ्यः यथा जयपुरतः (ढूंढाडतः) मारवाड़तः, मेवाड़तः, शेखावाटीतः, मत्स्यमण्डलतश्च वाक्पुत्राणां काव्यरसधारा अद्यावधि अबाधगत्या प्रवाहिताऽस्ति। समयानुसारं सामाजिकं राजनैतिकं मूल्यपरकञ्च परिवर्तनं यदभवत् तदस्माकं संस्कृत-संस्कृत्यो रक्षितृभिः मनीषिभिः नाट्यमाध्यमेन स्वीकृतम्। नवीनतां संयोज्य लेखने नवाचारः स्थापितः। यथार्थरूपेण तु सम्पूर्णमानवजीवनमेव नाटकमस्ति। प्रकृतिनटी विभिन्नैर्दृश्यैः विविधाभिः परिस्थितिभिः प्रतिक्षणं मानवं नर्तयति एव। आचार्य भरतमुनिना अत एवोद्घोषितं यत् नाट्यमस्ति पंचमो वेदः। जीवनस्य विविधाभिः घटनाभिः मानवस्य प्रत्यक्षतः साक्षात्कारः भवति। भरतमुनिना 'नाट्यशास्त्रम्' इति नामको बृहत्तमः नाट्यग्रन्थो रचितः। तत्र नाट्य-लेखनस्य, मंचनस्य चोपयोगिताया: सूक्ष्मतरं वर्णनमस्ति। तं ग्रन्थमेवाधिकृत्य पुराकालादेव नाट्यलेखनस्य मंचनपरम्पराया: विकासस्य च क्रम उत्तरोत्तरं जायमानोऽस्ति।

अस्यामेव नाट्यलेखन-मंचन-परम्परायां राजस्थानस्य मनीषिणां महती भूमिकाऽस्ति। विंशशताब्द्याः पूर्वं यद्यपि नाटकस्य महत्वं आसीत्, किन्तु उत्तर-एकोनविंशशताब्द्यां नाटकं स्वपरिष्कृतं स्वरूपं आदधाति इति दृश्यते।

विंश-शताब्द्याः कालः तु नाट्यकृते स्वर्णकाल इव प्रतिभाति। यतोहि अस्मिन् काले यत्र पुरातात्विक-ऐतिहासिक-सामाजिक-पृष्ठभूम्याधारितानां नाटकानां प्रणयनमभवत् तथैवास्मिन् काले नवचेतना-समन्वितानि, नव-प्रयोगयुतानि, समयाधारितानि, रेडियोरूपकाणि, आधुनिक-समयबोधप्रचलितशब्द-संयोजितानि नाटक-नाटिकादीनि मनीषिभिः प्रणीतानि। तत्र लेखनं मंचनं च अबाधरूपेण नाट्यसाहित्यस्य-श्रीवृद्धौ योगदानमकुरुताम्। विंश-शताब्द्याः राजस्थानीया संस्कृत-नाट्यपरम्परा सुसमृद्धास्ति। अस्याम् परम्परायां मनीषिभिः यद्दत्तं योगदानं तत् अनुपममद्वितीयञ्चास्ति।

संस्कृतनाट्यपरम्परायामस्यां राजस्थानविश्व-विद्यालयस्य योगदानं गणनीयम्। विश्वविद्यालय-संस्कृत-विभागाध्यक्षः संस्थापकश्च डॉ. पुरुषोत्तम लालभार्गवः संस्कृतनाट्यरक्षणाय दृढ़संकल्पश्चासीत्। स जानाति स्म यत् संस्कृतं संस्कृतिं चैव अक्षुण्णां विधातुं संस्कृतमाध्यमेन लोकानुरंजनं परमावश्यकमस्ति। अत एव स स्व-विद्यार्थिनां (छात्राणां) संस्कृतनाटक-मंचनाय (अभिनयार्थम्) ध्यानाकर्षणं कृतवान् मंचनमाध्यमेन नाटकानि प्रादर्शयत्।

ईस्वीये सन् 1958 तमे वर्षे महाकविकालिदास-

कृतस्य 'अभिज्ञानशाकुन्तलम्' नाटकस्य मंचनं डॉ. भार्गवनिर्देशने वार्षिकोत्सवावसरे सर्वप्रथमं कृतम्। अस्मिन् नाटके वर्तमानाः प्रख्याता विद्वांसो विदुष्यश्च च अभिनयं कृतवन्तः। पुरुषोत्तम नागरः जनार्दन भट्टः, राजेश्वरी भट्ट सदृशाः अभिनेतारः आसन्।

डॉ. भार्गवस्य एव निर्देशने ई. सन् 1959 तमे वर्षे महाकविशूद्रक विरचितस्य 'मृच्छकटिकम्' इति नाटकस्य 'द्यूतकर-संवाहक' इत्यस्य प्रकरणस्य सफलमंचनं अभूत्। एतदनन्तरं तु अस्य नाटकस्य मंचनं विभिन्नाभिः संस्थाभिः यथाऽवसरं कृतम्।

अस्मिन् एव ईस्वीये वर्षे 'स्वप्नवासवदत्तम्' नाटकस्य हृदयग्राही अभिनयः, मंचनं संस्कृत-महाविद्यालयेऽभवत्।

1960 तमे वर्षे 'दूतवाक्यम्' भासप्रणीतस्य नाटकस्य, 'मृच्छकटिकम्' शूद्रक विरचितस्य च मंचनं कृतम्।

अस्यामेव श्रृंखलायां न केवलं पूर्वतनानां महाकवीनां नाटकानामेवायोजनं, मंचनं चाभूत् अपितु नवकथानकाऽऽधारितानां नवप्रणीतनाटकानां लेखनं कृत्वा आकाशवाणी (रेडियो) माध्यमेन संस्कृतनाट्य-प्रसारणं समारम्भणञ्च कृतम्।

1961 तमे वर्षे एव डॉ. भार्गवमहोदयेन कुमारसंभवस्य पंचमसर्गस्य रेडियोरूपान्तरणं कृतम्।

डॉ. भार्गव महोदयस्य उत्तराधिकारि-रूपेण राजस्थानस्य प्रख्यातविदुषः अभिनेतुः, काव्यकारस्य नाट्यकारस्य आचार्य हरिरामस्याविर्भावः अभवत्।

1962 तमे वर्षे आचार्य हरिरामनिर्देशने शूद्रकविरचितस्य 'मृच्छकटिकम्' इति नाटकस्य प्रथमपंचाड्कानां प्रस्तुतिः मंचनं मानसिंहमेडिकल-कालेज सभास्थले कृतम्। अत्रापि प्रख्यातहिन्दी-फिल्म हास्याभिनेता 'असरानी' अभिनयं कृतवान्।

1963 तमे वर्षे आचार्याणां निर्देशने- 'मुद्राराक्षसम्' इति राजनीतिप्रधाननाटकस्य प्रथमाङ्कस्य मञ्चनं कृतम्। तत्र श्रीनन्दकिशोरगौतमः चाणक्यस्य (कौटिल्यस्य) भूमिकायां प्रस्तुतः अभवत्।

नाटकस्य प्रचार-प्रसारार्थ एव तात्कालिकसर्व-कारेण 1964 तमे वर्षे 'रामनिवास उद्याने' 'रवीन्द्र मंच' इति नामधेयायाः नाट्यशालायाः स्थापना कृता।

अस्मिन् काले मौलिकनाटकानां लेखनं अल्पमात्रायां एवाभवत्। जनानुरंजनाय संस्कृतभाषाविकासाय च प्राचीननाटकानां अभिनयो-मंचनं एव प्रमुख-रूपेणाऽभवत्। स्वातन्त्र्योत्तरं राजस्थानीयनाट्यसाहित्यं रंगमंचस्याभिनयस्य च प्रबलं समर्थकं प्रतिभाति।

1965 तमे वर्षे भट्टनारायण-विरचितस्य 'वेणी-हारम्' इत्यस्य नाटकस्य आचार्याणां निर्देशने प्रदर्शनमभवत्। अत्र स्वयं हरिरामाचार्यः दुर्योधनस्य भूमिकायां अवतरितोऽभूत्।

अनन्तरं तु प्रख्यातनाटकानां मंचनस्य अजस्रधारा प्रवाहिताऽभवत्। 1969 तमे वर्षे महाकविभास-विरचितानां 'दूतवाक्यम्' स्वप्नवासवदत्तम् इत्यादीनां नाटकानां प्रदर्शनं विशालजनसमूहस्य समक्षं कृतम्।

इस्वीये वर्षे 1975 तमे प्रो. श्रीधर भास्कर वर्णेकर रचितस्य नवकलेवरयुतस्य 'विवेकानन्द-विजयम्' नाटकस्य आचार्यहरिराम महोदयानां सांनिध्ये 'रविन्द्र मंच' इत्याख्य-रंगमंचोपरि अतिशयहर्षोल्लासेन प्रभूतजनसम्मर्द-मध्ये प्रस्तुतीकरणं, प्रदर्शनं कृतम्। विंश-शताब्द्यां तत्रैव संस्कृतनट्यपरम्परायां नवसामाजिक-चेतनायुतानां राजस्थानीयविद्वद्भिः नवोन्मेषशालिनीप्रज्ञया नवनाटकानां लेखनमपि कृतम्।

1956 तमे वर्षे प्रो. इन्दुशेखरः 'शंकरदिग्विजय' नाटकं लिखितवान्। भट्टमथुरानाथशास्त्रिणा 'मंजुनाथः' इति उपनाम विभूषितेन 'मंजुला' नाटकं लिखितम् 1957 तमे वर्षे। देवर्षिकलानाथशास्त्रिणा 'विरहिणी'

'महाभिनिष्क्रमणम्' 'रूक्मिणी' पृथ्वीराजविजयम् 'चित्तौड़सिंह:' कविताया मूल्यम् इत्यादीनां रेडियोरूपकाणां लेखनं कृतम्।

डॉ. हरिरामाचार्येण 'पूर्वशाकुन्तलम्' सत्यमेवजयते 'गंगालहरी' 'प्रतिदानम्' आषाढ़स्य प्रथमदिवसे, एकलव्य:, पं. गंगाधर द्विवेदिना मृगांकावली, महर्षिव्यास: 'महामंत्री चाणक्य:' डॉ. प्रभाकर शास्त्रिणा 'शंकराचार्य', 'माघकवि:' स्व. रतिकान्त चौधरी महोदयेन 'हम्मीर-प्रतिज्ञा' आदय: लिखिता:। इत्थं विंश-शताब्द्या: संस्कृत नाट्यपरम्परायां राजस्थानस्य मनीषिणां महत्वपूर्णयोगदानं वर्तते।

श्री नारायण शास्त्री 'कांकर:' श्री मेवाराम कटारा, श्री ताराशंकर पाण्डेय:, श्री पद्म शास्त्री प्रभृतीनां मनीषिणां सतत-संस्कृतसाधनया संस्कृतनाट्यश्रृंखला अद्यावधि अबाधरूपेण गतिशीलाऽस्ति, भविष्यति च।

राजस्थाने संस्कृतनाट्यपरम्परा सुसमृद्धाऽऽसीत् अस्ति च। ऐतिहासिक कथानकै: सह सामाजिक-समस्याधारितानां नाटकानां प्रणयनं बहुधा दृश्यते। तत्रापि समयानुसारं नव-नूतनकलेवरं गृहीत्वा नाटकं प्रसन्नं प्रतिभाति। यतोहि आधुनिकपरिदृश्ये सार्वभौमीकरणस्य कारणात् बहुभाषाणां शब्दानां समावेशो नाटककारै: नाटकेषु क्रियते। आंग्लभाषाया: तकनीकिशब्दानां संस्कृते यत्र कुत्रचित् अनुवाद: अस्ति यत्र-कुत्रचित् यथावत् एव आगच्छन्ति।

डॉ. कलानाथशास्त्रिणा आंग्लभाषीयाणां (सिम-कार्ड, मैमोरी इत्यादि) शब्दानां संस्कृते यथोचित नामानि प्रदीयन्ते। अत: वर्तमाननाटकेषु एषा नवीनता अपि दृष्टिपथं आयाति।

प्राचीनसमयादेव राजस्थानस्य स्थापनादेव संस्कृत-साहित्यलेखनपरम्पराया: प्रारम्भोऽभवत्।

इत्थं तत: प्रारभ्यमाणा संस्कृतलेखनपरम्परा अद्यावधि गंगावत् प्रवाहिताऽस्ति।

शोधच्छात्र:
जरारासं. विश्वविद्यालय:, जयपुर

**संस्कृतसमाचार:**

## डॉ. रमाकान्तशुक्लाभिनन्दनम्

भारतीयसंस्कृतपत्रकारसंघाध्यक्षस्य राष्ट्रपति-सम्मानितस्य पद्मश्रीत्यादिसम्मानसभाजितस्य ''अर्वाचीनसंस्कृतम्'' पत्रसंस्थापकसम्पादकस्य कविप्रवरस्य विविधग्रन्थसम्पादकस्य सुप्रथितस्य विद्वद्वरेण्यस्य डॉ. रमाकान्तशुक्लस्य पञ्चसप्ततिवर्षीयमायु: सानन्दं प्रपूर्य सरस्वतीसेवानिरतस्य कौस्तुभजयन्ती-मुपलक्ष्याभिनन्दनसमारोह: 24 दिसम्बर 2015 दिवसे दिल्ली-संस्कृत-अकादम्या: सम्मेलनभवने वरिष्ठैर्विद्वद्भिरायोजितो यत्र तस्मै ''हीरकप्राभृतकं'' विशालग्रन्थरूपेण समर्पितं, तत्सारस्वतसेवाविवरणं च प्रस्तुतम्। सरस्वतीपुत्रायास्मै भारती-परिवार: शतशोऽभिनन्दनवाचो व्याहरति परमेश्वरं च प्रार्थयत्यस्मै सक्रिय-सानन्द-शतायुष्ट्वं प्रदातुम्।

## डॉ. ताराशङ्कर पाण्डेयाय साहित्यअकादम्या अनुवादपुरस्कार:

जयपुरस्थ-जगद्गुरु रामानन्दचार्यराजस्थान संस्कृत-विश्वविद्यालये साहित्यविभागस्याचार्याय डॉ. ताराशङ्करपाण्डेयाय केन्द्रीय साहित्य अकादम्या ऐषम: संस्कृतभाषायामुत्कृष्टानुवादकृतये प्रदेय: पुरस्कार: (50,000/-) प्रदास्यत इति घोषितम्। अयं पुरस्कारस्तस्मै जयपुरीयगुलाबकोठारिण: कृते: ''मैं ही राधा मैं ही कृष्ण'' इत्याख्याया: ''अहमे राधा अहमेव कृष्ण:'' इति शीर्षकवह-स्यानुवादस्य कृते घोषित:। अकादमी प्रत्यब्दं 24 भाषाणां सर्वोत्कृष्टकृतये यथा पुरस्कारमेकं प्रददाति, तथैव प्रत्यब्दमेकस्यै युवकृतयेऽपि पुरस्कारं ददाति, सहैव एकस्यै अनुवादकृतयेऽपि, एकस्यै बाल-साहित्यकृतयेऽपि।

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### काव्यप्रयोजनम्

अर्थधर्मौ ततः – काममोक्षाविताः,
शर्मलब्धिर्हि लोकेतरानन्दथुः।
धर्मजायोपदेशो यशो लोकधीः,
आहता हा कथं भारते भारती।। 216।।

### काव्यहेतुद्वयम् एकञ्च

कारयित्री च या भावयित्री द्वयी,
काव्यहेतुस्सुमेधा पुराऽगीयत।
कैश्चिदुक्तम्बुधैर्मात्रमेधैव सा,
हा कथं भारते भरती आहता ।। 217।।

### मात्रमेधा कथं काव्यहेतुः अपोद्यं विना

मात्रमेधा कथं काव्यलिंगं भवेच्,
चारुबीजम्मृदाप्यम्बुनेदं विना।
सम्भवेत् कुत्र किम्पादपोऽयं कदा,
हा कथं भारते भारती आहता।। 218।।

### अलंकारसम्प्रदायप्रवर्तकः भामहः

भामहः ख्यात्यलङ्कारमात्मेति यं,
रुद्रटश्चापि तत्रैव धत्ते धियम्।
वक्ति तज्जीवनं शेखरोऽलङ्कृतं,
भारते आहता भारती हा कथम्।। 219।।

### काव्य-आत्मवैविधी

रीतिरात्मा कथं वक्रवाचो ध्वनिः,
वेत्ति वेद्यान्तरस्पर्शशून्यो रसः।
भ्रामयन्ती प्रबुद्धम्बुधां वैविधी।
हा कथं भारते आहता भारती।। 220।।

### ध्वनिसम्प्रादायजन्मदाता वैयाकरणस्फोटः

श्रद्धाति प्रबुद्धो नवीनम्प्रति,
प्रत्नमार्गं विमुच्यावहो वेदिनाम्।
व्याकृतेस्स्फोटवादं ध्वनिं धावति,,
आहता हा कथं भारते भारती।। 221।।

### वक्रोक्तिसम्प्रदायसंचालकः कुन्तकः

जीवितन्तत्र विद्योतते संस्कृते,
वक्रवाचः कृतिः कुन्तकस्य प्रथा।
रोचते वेदिने काव्यशास्त्रस्य सा,
हा कथं भारते भारती आहता।। 222।।

### काव्यशास्त्रचूडामणिः मम्मटः

काव्यशास्त्रेषु काव्यप्रकाशो महान्,
सारकोऽयं ध्वनेस्तस्य विस्तारकः।
मम्मटोऽनेन यातः प्रसिद्धिं प्रधीः,
हा कथं भारते आहता भारती।। 223।।

### रसवादी-कविराजःविश्वनाथः तत्साहित्यदर्पणम्

दर्पणं विश्वनाथः कवीनामसौ,
तेन तत्रातिशस्तं सुचक्रे ततः।
मम्मटोक्तं विखण्डीकृतं लक्षणम्,
आहता भारते भारती हा कथम्।। 224।।

व्याख्याता-संस्कृत
राजकीयश्रीकल्याणमहाविद्यालयः, सीकरम्

# श्रीमद्दादूदर्शनं तस्य आचार्यपरम्परा च

❑ श्रीमती अञ्जना शर्मा

दादूदर्शनं सन्तदादूदयालस्य वाणीम् अवलम्ब्य प्रवर्तितम्। अस्य मुख्य आचार्यस्तु सन्तप्रवरः श्रीमद्दादूदयाल एवासीत्। निर्गुणब्रह्मतत्त्वस्य प्रतिपादनम् अत्र मूलभूतं वर्तते। आद्यशंकराचार्यप्रतिपादितब्रह्मविषयकसिद्धान्तान् आधारीकृत्य तत्पर्यालोचनपूर्वकं दर्शनमिदमुपक्रमते। दादूदर्शने अनुभूतिवादः प्रमुखः सिद्धान्तोऽस्ति। अनेनेदं स्पष्टीकृतं यत् ब्रह्मणः साक्षात्कारोऽनुभूतिरूप एव भवति। बाह्यान्तरिन्द्रियाणां तत्साक्षात्कारस्यासम्भवात् केवलमात्मना एव ब्रह्मानुभवो जायते। तत्कृते यः साधनामार्गः प्रतिपादितः सः योगदर्शनसमानान्तरमस्ति किन्तु दादूपन्थानुयायिभिः साधुजनैः यः साधनामार्गोऽवलम्बितः स क्वचिद् योगमार्गाद्भिन्नो भक्तिमार्गमात्रानुसारी वर्तते। वस्तुतस्तु भक्तियोग एव दादूदर्शनस्याचार्यैः स्वयमपि व्यवहारे स्वीकृतः।

दादूदर्शने ब्रह्मेतरतत्त्वानामपि व्यापकेन प्रतिपादनं विहितम्। तेषु ज्ञानतत्त्वस्य कर्मणश्चापि मीमांसा व्यापकतया द्रष्टुं शक्यते। ज्ञानकर्मणोरतिरिक्तं प्राणिजन्मनः सार्थक्याय जीवतत्त्वस्य जगत्तत्त्वस्यापि समीक्षणे भारतीय दार्शनिक-चिन्तन परम्परामनुसृत्य विहितमस्ति। उपदेशात्मिक्या भाषया दादूदर्शनस्य सिद्धान्तानां प्रचारः प्रसारश्च मध्यकाले प्रभूततर आसीत्। तत्पश्चात् आरभ्य अद्यावधि दादूदर्शनस्य चिन्तनधारा प्रवर्तमाना अवलोक्यते। सन्तदादूदयालानन्तरं सन्त सुन्दरदासः उल्लेखनीयो विद्वान् जन्मालभत अस्यानेके दार्शनिकग्रंथा उपलभ्यन्ते यथा-देहप्राणसंवादः तर्कचिन्ता-मणिः, ज्ञानसमुद्रः, विवेकचिन्तामणिः, तदादयोऽन्येऽपि बहवो ग्रन्थाः सन्ति।

सन्तप्रवरसुन्दरदासस्य अनन्तरं सन्त निश्चलदासः दादूदर्शनस्याचार्यपरम्परायां उल्लेखनीयो विद्वान् अभवत्। अनेन विदुषा ब्रह्मबोधवृत्तिभास्करः, वृत्तिप्रभाकरः, विचारसागरश्चेति त्रयोऽद्भुता ग्रन्था विरचिताः। एषु ग्रन्थेषु जीवब्रह्मणोरैक्यं प्रतिपाद्य कथं जीवो ब्रह्मबोधाय प्रवर्तेत इति विषये पर्याप्तं तत्त्वालोचनं कृतम् अस्ति। सन्त निश्चलदासस्य समनन्तरं जनगोपालदासस्यापि स्थानम् उल्लेखनीयम् अस्ति। एतद्विरचितः मोहविवेकसंवादः आत्मबोधाय महत्त्वपूर्णोऽस्ति। तत्परवर्तिषु आचार्येषु ध्रुवदासः कर्मविपाकगीतां सृष्टवान्। अयं ग्रन्थो भगवद्गीता इव अद्भुतं चिन्तनं प्रस्तौति। सन्तजगन्नाथकृतो गुणकुञ्जकेलिः (हिन्द्यां गुणगञ्जनामा) भक्तिमार्गस्य बोधाय अद्भुतो ग्रन्थोऽस्ति।

सन्त हरिरामदासः भारतीयदर्शनपरम्पराया विषयान्त-राण्यवलम्ब्यापि चिन्तनं प्रास्तौत्। अस्य द्वौ ग्रन्थावुपलभ्येते धर्मितावच्छेदकप्रत्यासत्तिविचारः सामान्य-लक्षणविचारश्च। तत्पश्चात् चरणदासस्य स्थानं विशिष्टमस्ति। अनेन विदुषा ज्ञानस्वरोदयः ग्रन्थो रचित आसीत्। अस्यैव समकालिकः परमहंसदासोऽपि दादूदर्शनस्य चिन्तनधारामग्रे प्रसारयितुं सततं प्रायतत। अनेन विरचितो 'दशमुद्रा' इत्याख्यो ग्रन्थः योगदर्शनस्य क्षेत्रे अत्यद्भुतो विशिष्टश्च वर्तते। एतत्पर-वर्तिकालिकेषु आचार्येषु माणकदास उल्लेखनीयोऽस्ति। अस्य 'आत्मविचारः' इत्याख्यो ग्रन्थः सम्प्रति उपलभ्यते। एवमेव धर्मदासः नृसिंहदासः पंचरङ्गदासः सरोजानंदतीर्थश्चापि उल्लेखनीयाः आचार्याः अभूवन्। धर्मदासस्य ज्ञानसागरः, नृसिंहदासस्य तत्त्वबोधप्रकरणम्, पञ्चरङ्गदासस्य स्वोपज्ञटीकासहितः आत्मबोधः, सरोजानन्दतीर्थस्य षट्पदी दादूदर्शनस्य चिन्तनपरम्परायां ग्रन्थेषु महत्त्वपूर्णा मन्यन्ते।

केचन आचार्या एतादृशाः सन्ति येषां स्थिति-कालयोर्विषयोऽज्ञातोऽस्ति। यथा खेमदासः, शुकदेवः, विशुद्धानन्दः, बालमुकुन्दः, सच्चिदानन्दः, अन्ये च तदादयः। एषु खेमदासकृतः कर्मधर्मसंवादः, शुकदेवकृतः अध्यात्मप्रकाशः, विशुद्धानन्दकृता अध्यात्मकारकावली, बालमुकुन्दकृता विज्ञानगीता, सच्चिदानन्दकृतम् अनुमान-प्रकरणं उपलभ्यते। इमे ग्रन्था अपि दार्शनिकतत्त्वालोचने चिन्तनस्य वैशद्यं स्फोरयन्ति। स्वातन्त्र्योत्तरकालिकेषु दादूदर्शनस्याचार्येष्वपि नारायणदासः विचारसागरस्य

प्रवक्तृत्वेन प्रसिद्धो बभूव। तत्कृतो 'जीवन्मुक्तिः विदेहमुक्तिश्च' ग्रन्थो मुक्तितत्त्वस्य सम्यङ् निरूपणं प्रस्तौति। एवमेव मनोहरदास निरंजनीकृता ज्ञानमंजरी अपि बालबोधाय परमोपयोगिनी वर्तते।

एवं दादूदर्शनस्याचार्यपरम्पराया निदर्शनेन दादूदर्शनस्य ग्रन्थानां दर्शनेन चेदं स्पष्टीभवति यत् दादूदर्शनं प्राक्तन-भारतीयचिन्तरपरम्परायां स्वकीयं विशिष्टं स्थान बिभर्त्ति। खेदस्यायं विषयो यत् विंश्या शताब्द्या उत्तरार्द्धे दादूदर्शनस्य चिन्तनपरम्परायाम् स्खलनं समागतम्। अतएव आचार्य-परम्परा तु अवरुद्धप्राया जाता किन्तु पञ्चशताब्दं यावत् दीर्घकालखण्डे दादूदर्शनस्य यच्चिन्तनं प्रवर्तितं तदद्यापि दर्शनस्याध्येतृणां कृते परमोपादेयमस्ति। अध्यात्मानुरागिणां कृते तत्त्वसाक्षात्कारायापि अस्य सिद्धान्ताः वस्तुतः आचरणीया व्यवहार्याश्च वर्तन्ते।

**श्री दादू आचार्य संस्कृतमहाविद्यालयः**
**जयपुरम्**

# भार्ये ! त्वं मधुमोहिनी मधुभरा

❑ **डॉ. राजेशकुमारगुप्तः**

भार्ये ! त्वं सुखकारिका सुवदना लावण्यपूर्णा परं,
कल्याणी सुभगा सदैव शुभदा संस्कारसिद्धा स्वयम्
सौन्दर्यं मुखमण्डले तव गिरा प्रज्ञावती भासते,
कण्ठे वाग् मधुरा सुधा नयनयो रागान्विता भावना।।1।।

जाये ! त्वं शिशुपालिका शिशुधरा संस्कारदात्री सदा
बालानां प्रथमा गुरुः श्रुतिवचः शिक्षासुधादायिका।
स्वादिष्टं सरसं ददासि सकलं खाद्यं च पेयं शुभं
सौम्या शान्तिप्रदा सुमङ्गलकरी धर्माङ्गिनी भूतिदा।।2।।

कान्ते ! त्वं सुनियोजनेऽतिनिपुणा मां धार्मिके पावने,
सत्कार्ये हितकारिमङ्गलप्रदे निःश्रेयसे जीवने।
लक्ष्यं पूरयितुं त्वया स्वमनसा वाचा तथा कर्मभिः
साहाय्यं क्रियते मुदा भवति तत् साफल्यसूत्रं महत्।।3।।

भार्ये ! त्वं हृदयं मतिर्मम गतिर्देहस्य संजीवनी,
छाया त्वं सघना तरोः सुखकरा तापे प्रचण्डे रवेः।
तापात् तप्तमनोधरां शमयितुं वृष्टेर्जलं शीतलं,
शैत्ये कम्पनदे त्वमेव तपनो देहाय वह्निः पुनः।। 4।।

भार्ये ! त्वं मधुमोहिनी सुमधुरा मातङ्गिनी मानिनी,
लोके कल्पतरुर्ददासि सुरतिं कामाग्निशान्तिप्रदाम्।
धैर्यं त्वं शमदा विपत्तिसमये देशे विदेशे तथा,
निःस्वार्था सहयोगिनी प्रतिपलं मित्रं मनोहारिणी।।5।।

किंङ्कर्त्तव्यविमूढता विकलता बुद्धिभ्रमः स्याद् यदा,
भूत्वा त्वं पथदर्शिका सुमतिदा धर्मोपदेष्ट्री तदा।
निःसारे भुवने त्वमेव सरसा सारोऽसि सत्यं परं
लक्ष्मीस्त्वं गृहमन्दिरस्य युवती मान्या सुरम्या शुचिः।।6।।

दुर्गा त्वं कुलरक्षिका भयहरा गौरी च सिद्धिप्रदा,
ब्रह्माणी गृहसर्जिका सुचरिता त्वं पालयित्री नवा।
लावण्यं दयिते! तवाऽस्ति मदिरा नाकेऽपि यद् दुर्लभं,
जाये! त्वं मृगलोचना रतिवरा दिव्याप्सरः सुन्दरी।।7।।

स्वप्नस्त्वं मधुरो विधेर्नवरसैः सिक्ताद्भुता कल्पना,
नैराश्ये सुखदुःखयोः सममतिः सेवापरा धार्मिकी।
भार्ये ! त्वं भवनायिका कुलवधूः संसारकाव्ये रसः,
सौभाग्यं मम जीवनस्य सुकृती रत्नं विशिष्टं सुमम्।।8।।

**संस्कृत-विभागः, केन्द्रीयविद्यालयः**
**क्र. 2, सैन्यस्थलम्, जयपुरम्**

# व्याकरणशास्त्रम्

❑ डा. सुरेन्द्रकुमारशर्मा

**प्रकृति-प्रत्ययार्थपुरस्सरं शब्दसाधुत्वबोधकं शास्त्रन्नाम व्याकरणम्।** वेदस्य शब्दब्रह्ममयत्वात् तदर्थप्रतिपादकत्वेनोपकारकत्वाद्धि व्याकरणं वेदाङ्गमिति कथ्यते। शब्दगतार्थबोधस्य प्रतिबोधनादिदं वेदाङ्गेषु मुखमिव प्रधानं वर्तते। तथोक्तं **मुखं-व्याकरणं स्मृतम्।** मुचां ह्यभिव्यक्ति-विश्लेषणयोश्च साधनं यथा भवति तद्वदेव पद-पदार्थयोः वाक्य-वाक्यार्थयोः प्रकृति-प्रत्ययोश्च विश्लेषण-साधकमिदं व्याकरणं वर्तते। तदुक्तं-**व्याक्रियन्ते विविच्यन्ते शब्दा अनेनेति व्याकरणम्।** अर्थात् येन प्रकृति-प्रत्ययौ विविच्येते तद् व्याकरणम्। यजुर्वेदे व्याकरणस्य सूक्ष्मं-रूपं वर्णितमस्ति तद्धि-प्रजापतिरूपेषु सत्यानृतयोः (स्फोटध्वनयोः) व्याकरणं (विश्लेषणं) कृतवान्। तेनासत्ये अश्रद्धायाः सत्ये च श्रद्धायाः प्रतिष्ठापना कृता। यथोक्तं-यजुर्वेदे (19-77)

**दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः।**
**अश्रद्धामनृतेऽदधाच्छ्रद्धांसत्ये प्रजापतिः।।**

ऋक्संहितायां व्याकरणस्य स्वरूपं तथाविधवृषभरूपेण प्रतिपादितं यत् खलु शब्दं करोति। कथ भूतमितिचेदुक्तम्-

**चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्ता सोऽस्य**
**त्रिधाबद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश।।**

अर्थादस्य वृषभरूपस्य व्याकरणस्य चत्वारि शृङ्गाणि सन्ति तानि हि नामाख्यातोपसर्गनिपातरूपाणि। त्रयः पादा भूतभविष्यद्वर्तमानरूपाः। द्वे शीर्षे सुप्तिङन्ते। सप्तविभक्तयः सप्तहस्ताः सन्ति उरसि शिरसि कण्ठे च त्रिधा बद्धोऽस्ति। एवं भूतं वृषभरूपमिदं व्याकरणं रोरवीति वारं वारं शब्दं करोति शब्दान् बोधयतीति तात्पर्यम्। एवंभूतेनानेन व्याकरणेन विना कोऽपि जानन्नपि न जानाति पश्यन्नपि न पश्यति शृण्वन्नपि न शृणोति। किञ्च यो हि जानाति व्याकरणमिदं, तत्सम्मुखं वाणी सुसज्जिता कामिनीव समागत्य सर्वतोभावेन स्वात्मानमर्पयति सर्वं प्रकाशयति इति। यथोक्तं ऋग्वेदे-

**उतत्वः पश्यन् न ददर्श वाचम् उतत्वः शृण्वन् न शृणोत्येनाम्।**
**उतोत्वस्मै तन्वं विसस्त्रे जायेव पत्ये उशती सुवासाः।।**

अस्य व्याकरणस्य महत्वं प्रतिपादयता आचार्य-भर्तृहरिणाप्युक्तम्-

**अर्थप्रकृतितत्त्वानां शब्दा एव निबन्धनम्।**
**तत्त्वावबोद्योलोकानां नास्ति व्याकरणादृते।।**

भगवता पतञ्जलिना हि व्याकरणाध्ययनस्य मुख्यत्वेन पञ्च प्रयोजनानि प्रतिपादितानि तद्यथोक्तम् स्वकीये महाभाष्ये-''**रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति।**''

व्याकरणशास्त्रस्याविर्भावमधिकृत्य निश्चयेन न किमपि कथनं सम्भवं तथापि एतत्तु वक्तं शक्यं यदुपलब्धवैदिक-पाठेभ्यः प्राक् व्याकरणं पूर्णतां गतमासीत्। अस्य परम्परा-विषये स्वयमेव भगवान् पतञ्जलिः निगदति ''**ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भारद्वाजाय भारद्वाजो ऋषिभ्यः** तं समनुक्रंतं खल्विदं व्याकरणम्। एतद्धि ब्रह्मराशिः ब्रह्मप्रतिपादको शब्दराशिरिति यावत्। न भुक्त्वा न नक्तं प्रब्रूयादिति'' एतेनास्यापि अनादित्वमेव सिद्ध्यति।

व्याकरणमिदमगाधमनन्तञ्च शब्दार्णवमस्ति। पण्डित-समाजे एका गाथा प्रचलिता वर्ततेऽस्मिन् विषये तथाहि-

**समुद्रवद् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ।**
**तद्भागभागाश्च शतं पुरन्दरे कुलाग्रबिन्दूत्पतितं हि पाणिनौ।।**

वाल्मीकिरामायणस्य रचनाकाले व्याकरण-स्याचध्यनाध्यापनं पूर्णतया सुव्यवस्थितं प्रचलितमासीत्। तद्धि यथा श्रूयते-

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।।**
**बहु व्याहरताऽनेन न किञ्चिदपभाषितम्।।**

भारतयुद्धकालवर्तिनि यास्क-निरूक्ते बहूनां व्याकरणा-चार्याणामुल्लेखो दृश्यते। आचार्यः शाकटायनस्तु नैजं व्याकरणं

यास्कादपि प्राक् लिलेख। तैत्तिरीयसंहितायामस्य विषयस्य तथा प्राचीनतमोल्लेखो विद्यते। यथा वा श्रूयते-'' **वाग् वै पराच्य व्याकृताऽवदत्। ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुर्विति। सोऽब्रवीत् वरं वृणे मध्यं चैवेष वायवे च सह गृह्यता इति। तस्माद् ऐन्द्रवायवः सह गृह्यते। तामिन्द्रो मव्यातोः वक्रम्य व्याकरोत्।** तस्मादियं व्याकृता वागुच्यते।

वस्तुतः नहि व्याकरणज्ञानमन्तरा भाषायाः तात्त्विकं स्वरूपं ज्ञातुं शक्यते। व्याकरणमेव भाषायाः स्वरूपं सङ्घटनाञ्च सर्वात्मना व्याकरोति। तस्माद् अष्टसु शक्तिग्रहेष्वपि व्याकरणमेव प्राथम्येन गृह्यते। तथोक्तं हि- शक्तिग्रहं व्याकरणोपमानेत्यादिः। व्याकरणस्य नितान्त-मुपादेयत्वं विलोक्य एव विद्वत्सु व्याकरणविषयकमाभाणकं प्रचलितमस्ति। तथाहि-

**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।**<br>**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।।**

तस्मादिदं व्याकरणं सर्वैरेवाध्येतव्यमिति।

**व्याकरणस्याचार्याः**- श्रूयन्ते हि व्याकरणकर्तृकाणा-माचार्याणां नामानि तथा च तत्तदाचार्यनाम्ना प्रथितानि व्याकरणान्यपि। व्याकरणाचार्यविषये भविष्यपुराणेऽपि दृश्यते चर्चा तत्रोक्तं अष्टौ व्याकरणानि। तद्यथा-

**प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।**<br>**याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।।**<br>**सावित्रञ्च तथा प्रोक्तमष्टमं वैष्णवं तथा।।**

'हेमबृहद् वृत्त्यचूर्णि' नामके ग्रन्थे 'ब्राह्म-एशानम् ऐन्द्रं-प्राजापत्यं-त्वाष्ट्रं-आपिलं-पाणिनीयञ्चेत्यष्टौ व्याकरणानि परिगणितानि सन्ति। तथोक्तं तत्र-

**ब्राह्ममैशानमैन्द्रं च प्राजापत्यं बृहस्पत।**<br>**त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टमम्।। इति।।**

ऋग्वेदकल्पद्रुमे यामलाष्टकतन्त्रे निर्दिष्टान्यष्टविध-व्याकरणान्यधोलिखितानि सन्ति। तद्यथा-

**ब्राह्मं चान्द्रं याम्यं रौद्रं वायव्यं वारुणं सौम्यं वैष्णवमिति।**

एवमेव बोपदेवविरचिते कल्पद्रुमे उल्लिखिता अष्टौ वैयाकरणाः सन्ति। इन्द्रः चान्द्रः काशकृत्स्न आपिशली शाकटायनः पाणिनिः अमरजैनेन्द्रः जयन्तिश्चेति।

**प्राचार्यः**<br>**श्री दादू आचार्य संस्कृतमहाविद्यालयः, जयपुरम्।**

---

**।। बालगीतम् ।।**

# क्रीडनकम्

❑ **परमानंदशर्मा ''प्रमोद''**

मातः! देहि मे क्रीडनकम्।<br>सरला क्रीडति विमला क्रीडति,<br>कृष्णा क्रीडति निरन्तरम्।।

काष्ठगजम् अश्वं वा देहि,<br>अथवा नवमरुतरयानम्।<br>पत्रनिर्मितं जलयानं वा,<br>गगनगामिनूतनयानम्।।

धातुनिर्मितं किमपि ददातु,<br>कुञ्चिचालितं क्रीडनकम्।।<br>मातः! देहि मे क्रीडनकम्।।

रामः कपिना श्यामोऽहिना,<br>दुर्गा च क्रीडति सिंहेन।<br>नित्यं क्रीडति गणपतिभ्राता,<br>अतिलघुमूषकयानेन।।

ददातु मह्यं मातः। शीघ्रम्,<br>एकं धवलं लघुशशकम्।<br>मातः! देहि मे क्रीडनकम्।।

शंखं वादयति गोविन्दः,<br>कृष्णो मुरलीं मनोरमाम्।<br>नृत्यं कृत्वा शिवो वादयति,<br>डम डम ढक्कामतिमधुराम्।

अहमपि याचे एकां वीणां,<br>वादयामि तामहर्निशम्।।<br>मातः! देहि मे क्रीडनकम्।।

रा.उ.मा.वि. आगूँचा, जिला-भीलवाडा

नारी-स्तम्भः

# नृत्येन मृणालिनी, मृणालिन्या च नृत्यम्

❑ डॉ. राजेश्वरी भट्टः



उत्कृष्टनृत्यकौशलेन दर्शकानां मनसि चमत्कृतिं जनयन्ती भारतीयशास्त्रीयनृत्यकलाया महिमानं विश्वस्मिन् विश्वे प्रतिष्ठापयन्ती, नृत्येन मृणालिनी-मृणालिन्या च नृत्यम् इति प्रशंसापरकैर्वचनैः लोके कीर्तिं कलयन्ती, ''मृणालिनी-साराभाई'' नृत्यकलाक्षेत्रे अनन्यमुपमानमासीत्। नृत्यनदीष्णा मृणालिनी 1918 तमे वर्षे केरलप्रदेशे श्रीसरस्वत्योः प्रसादेन विद्यावैभवसम्पन्ने विप्रवंशे जनिमलभत। मृणालिन्यः पिता 'सुब्बारावस्वामिनाथन' मद्रास प्रान्ते उच्चन्यायालये बहुश्रुतोऽधिवक्ताऽऽसीत्। सेवा दयादाक्षिण्यादिभिर्गुणैर्भूषिता मृणालिन्या जननी 'अम्भुकुट्टी' राष्ट्रहिताय समर्पिता महिलाऽऽसीत् या स्वाधीनतासंग्रामे अग्रेअग्रे सहयोगं कृतवती। राष्ट्रहिते विहितेन सहयोगेन समर्पणेन च अम्भुकुट्टी स्वाधीन भारतदेशे सर्वकारेण राज्यसभा सदस्य पदे प्रतिष्ठापिता। को न जानाति मृणालिन्या लक्ष्मी सहगलनाम्या ज्येष्ठभगिन्या राष्ट्रनिष्ठां महत्त्यागं स्मरणीयं चरित्रं च या स्वसुखानि परित्यज्य सुभाषचन्द्रबोस महाभागस्य नेतृत्वे 'आजादहिन्द-फौज' इति दलस्य 'कमान्डरइनचीफ' पदं व्यभूषयत्। 'भिन्नरुचिर्हि लोक' इत्यादि शास्त्र-वचनानि अवितथानि कुर्वन्त्यै स्वामिनाथन महोदयस्य कनिष्ठतमायै कन्यायै मृणालिन्यै बाल्यादेव नृत्यम् अतितरामरोचत। किन्तु तदानीन्तने समाजे सम्भ्रान्तपरिवारे कन्याभ्यो नृत्यकलायाः प्रशिक्षणं प्रशंसनीयं नासीत्। अभिभावकैः दृढ़ं वार्यमाणाऽपि-मृणालिनी आत्मनः संकल्पाद् मनागपि विचलिता न जाता। विवशः पिता अध्ययनस्य कृते पुत्रीं 'स्विटजरलैण्ड' देशे प्रेषयामास येन परिर्वर्तितपरिवेशे नृत्यं प्रति पुत्र्याः हठाग्रहः कदाचित् शिथिलो भवेत्, किन्तु नृत्यमेव जीवनलक्ष्यं मन्यमाना मृणालिनी विदेशे वसन्त्यपि पश्चिमशैल्याः नृत्यकलायां नैपुण्यं प्राप्तवती। नृत्यं प्रति पुत्र्या अदम्यामासक्तिमनुभूय जननी तां भरतनाट्यम् इति नृत्यशैल्यां पारंगताया नृत्य-निदेशिकाया निर्देशने नृत्यप्रशिक्षणाय प्रेषितवती।

1937 तमे वर्षे मृणालिनी अध्ययनस्य हेतोः शान्ति निकेतन इति शिक्षामन्दिरे प्रवेशमधिगतवती। तत्र मृणालिनी रवीन्द्रनाथ टैगोरमहोदयस्य छत्रच्छायायां साहित्ये संगीते-अन्य कलासु च नैपुण्यमधिगतवती, नृत्येन सह साहित्यसर्जनमपि मृणालिन्यै रूचिकरमवर्तत। मृणालिन्या विरचितं विपुलं साहित्यमुपलब्धं वर्तते। अध्ययन-समाप्त्यनन्तरं सम्प्रति शास्त्रीयनृत्यस्य भरतनाट्यम् कथकली माणिपुरी इत्यादिषु सर्वासु शैलीसु नैपुण्यमधिगन्तुं मृणालिन्या दृढ़ः संकल्प आसीत्। अस्य कृते मृणालिनी नृत्यस्य तत्तद्विधासु निष्णातगुरूणां सन्निधौ प्रशिक्षणं प्राप्य लोके अनुपमा नृत्याङ्गना रूपेण प्रथिता जाता। मृणालिनी शास्त्रीयनृत्यं नवनव-इति गत्या प्रदर्शितवती। 1942 तमे वर्षे मृणालिन्या नृत्यकौशलेनाऽभिभूतेन, अन्तरिक्ष-विज्ञान-जनकेन, प्रमुख-भौतिकविज्ञानिना 'विक्रम साराभाई' महाभागेन सह मृणालिनी परिणयसूत्रे बद्धा जाता। उदारचिन्तन-सम्पन्नस्य जीवनसह-चरस्य पूर्णसहयोगेन समर्थनेन च मृणालिनी अहमदाबादनगरे ''दर्पण अकादम्याः'' स्थापनां कृतवती। दर्पण अकादम्या माध्यमेन लोके नृत्यकलायाः प्रचारः प्रसारस्तु भवेदेव सहैवानेन महिलासशक्तीकरण-मानवाधिकार-पर्यावरण-संरक्षण सदृशीनां समस्यानां समाधानमपि जनानां कृते सुलभं भवेदिदमेव दर्पण संस्थायाः प्रमुख-मुद्देश्यं वर्तते। प्रशंसनीयैः प्रदर्शनैः आत्मनः संकल्पं साधयन्ती मृणालिनी देश विदेशेषु विशिष्ट पुरस्कारैः पुरस्कृता जाता। भारतसर्वकारेण मृणालिनी 'पद्मश्री' ततः पद्मभूषण सहैव अन्य पुरस्कार-शृङ्खलाभिः वारं वारं विभूषिता जाता। नृत्य, नाट्य, साहित्य, कोरियाग्राफी एवमेव बह्वीषु कलासु कुशला, राष्ट्रस्य गौरवभूता, मृणालिनी साराभाई 2016 तमे वर्षे नश्वरं शरीरं विहाय दिवंगता। किन्तु दर्पण अकादमी माध्यमेन मृणालिनी अत्रैव वर्तते। मृणालिन्याः पुत्री कुशल नृत्याङ्गना मल्लिका साराभाई कीर्तिशेषतां गतायाः स्वजनन्या मृणालिन्या अवशिष्टकार्यस्य पूर्णतां विधातुं सर्वथा कटिबद्धा वर्तते।

## हिन्दी अनुवाद

उत्कृष्ट नृत्यकला से दर्शकों के मन को चमत्कृत करने वाली, भारतीय नृत्यकला को समस्त विश्व में प्रसिद्धि दिलाने वाली, नृत्य से मृणालिनी एवं मृणालिनी से नृत्य की शोभा है, इस प्रकार की प्रशंसापरक ''उक्तियों से लोक में अपनी कीर्ति को फैलानेवाली मृणालिनी साराभाई'' नृत्यकला के क्षेत्र में अद्वितीय उपमान है। नृत्य में पारंगत 'मृणालिनी' का जन्म 1918 ई. में केरल प्रदेश में श्री एवं सरस्वती की कृपा से विद्या एवं वैभव से सम्पन्न ब्राह्मण परिवार में हुआ था। मृणालिनी के पिता सुब्बाराव स्वामीनाथन् ''मद्रासप्रान्त'' के उच्चन्यायालय में प्रसिद्ध वकील थे। सेवा दया औदार्यादि गुणों की खान मृणालिनी की माता राष्ट्रहित के लिए समर्पित महिला थी जिन्होंने स्वाधीनता-संग्राम में बढ़ चढ़ कर भाग लिया था।

मृणालिनी की माता अम्मुकुट्टी के त्याग एवं राष्ट्रप्रेम के परिणाम स्वरूप स्वाधीन भारत में उन्हें राज्यसभा का सदस्य बनाया गया। मृणालिनी की बड़ी बहिन 'लक्ष्मी सहगल' के नाम से कौन अपरिचित होगा? जिनके त्याग एवं राष्ट्रप्रेम के कारण सुभाषचन्द्र बोस के नेतृत्व में संगठित 'आजाद हिन्द फौज' में उन्हें कमान्डर इन चीफ के पद पर प्रतिष्ठित किया गया। लोक में भिन्न-भिन्न रुचि वाले मनुष्य हैं। इस शास्त्र की उक्ति को सत्य करनेवाली 'सुब्बाराव स्वामीनाथन' की सबसे छोटी पुत्री मृणालिनी की बाल्यावस्था से ही नृत्य की ओर अत्यधिक रूचि थी किन्तु उस समय सम्भ्रान्त परिवारों में कन्याओं के लिए नृत्य का प्रशिक्षण प्रशंसनीय नहीं था। अभिभावकों के द्वारा बहुत रोके जाने पर भी मृणालिनी नृत्य सीखने के संकल्प से तनिक भी विचलित नहीं हुई। विवश होकर पिता ने पुत्री को 'अध्ययन करने के लिए स्विटजरलैण्ड' भेज दिया जिससे परिवर्तित परिवेश में पुत्री का नृत्य के प्रति दृढ़ आग्रह कुछ शिथिल हो जाए। किन्तु नृत्य को ही जीवन समझने वाली मृणालिनी ने विदेश में रहकर भी पाश्चात्य शैली के नृत्य में निपुणता प्राप्त की। नृत्य के प्रति पुत्री की अदम्य इच्छा जानकर माता 'अभ्भुकुट्टी' ने पुत्री को 'भरतनाट्यम्' शैली के नृत्य प्रशिक्षण के लिए अत्यन्त प्रवीण शिक्षिका के निर्देशन में भेज दिया। एक वर्ष नृत्य सीखने के पश्चात् 1937 ई. में मृणालिनी ने अध्ययन के लिए 'शान्तिनिकेतन' में प्रवेश लिया। वहाँ 'रविन्द्रनाथ टैगोर' की छत्रछाया में साहित्य-संगीत तथा अन्य कलाओं में निपुणता प्राप्त की। नृत्य के साथ-साथ मृणालिनी की साहित्य सर्जन में भी विशिष्ट रुचि थी। मृणालिनी के द्वारा विरचित विपुल साहित्य उपलब्ध हैं। अध्ययन समाप्ति के पश्चात् अब मृणालिनी का संकल्प कथकली, मणिपुरी, भरतनाट्यम, इत्यादि नृत्य की सभी शैलियों में पूर्ण दक्षता प्राप्त करना था। इसके लिए मृणालिनी ने उस समय इन शैलियों के निष्णात गुरुओं के सन्निधि में प्रशिक्षण प्राप्त किया एवं श्रेष्ठ नर्तकी के रूप में प्रसिद्ध हुई। मृणालिनी ने अब शास्त्रीय नृत्य को नव गति एवं दिशा प्रदान की। 1942 ई. में मृणालिनी के उत्कृष्ट नृत्य कौशल से अभिभूत, अन्तरिक्षविज्ञान के जनक, प्रमुख भौतिक विज्ञानवेत्ता विक्रम साराभाई के साथ मृणालिनी का विवाह सम्पन्न हुआ। उदार चिन्तन से युक्त जीवनसाथी के सहयोग से मृणालिनी ने 'दर्पण अकादमी' की स्थापना की। दर्पण अकादमी का उद्देश्य नृत्यकला के प्रचार प्रसार के साथ-साथ महिला सशक्तीकरण, मानवाधिकार, पर्यावरण संरक्षण आदि समस्याओं का समाधान भी है। प्रशंसनीय कार्यों के द्वारा अपने संकल्प को सिद्ध करते हुए मृणालिनी देश-विदेश में विशिष्ट पुरस्कारों से पुरस्कृत हुई। भारत सरकार के द्वारा 'मृणालिनी साराभाई' को 'पद्मश्री' पद्मविभूषण एवं अन्य दुर्लभ पुरस्कार शृङ्खला से सम्मानित किया गया नृत्य, नाट्य, साहित्य, कोरियोग्राफी आदि अनेक कलाओं में प्रवीण 'मृणालिनी साराभाई' 2016 ई. में अपने नश्वर शरीर को त्याग कर दिवंगत हुई। किन्तु 'दर्पण अकादमी' के माध्यम से वे आज भी हमारे बीच मौजूद है। मृणालिनी साराभाई की पुत्री मल्लिका साराभाई कुशल नृत्याङ्गना के रूप में कीर्तिशेष जननी के अवशिष्ट कार्यो की पूर्णता के लिए सर्वथा कटिबद्ध है।

आयुर्वेद-स्तम्भः

# रसायनं यो विधिवन्निषेवते

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः



**सर्वासामोषधीनां समुचितं शुभं फलं विधिना सेवनेनैव भवति, तत्र कदाचित् स्खलनेनापि न्यूनाधिकं फलं भवत्येव, किन्तु रसायनस्य फलं तु विधिना सेवनेनैव भवति, अविधिना सेवमानस्य तु हानेरपि सम्भावना भवति। अत एव रसायनस्य सेवनं तु सर्वदा विधिपूर्वकमेव करणीयम्। सामान्यतया शास्त्रोक्तानां रसायनयोगानां प्रयोगे सर्वदा भिन्न-भिन्नविधीनां पथ्यापथ्यानाञ्च निर्देशो वर्तत एव, तथापि कतिपयानां सामान्यानां निर्देशानां पालनं तु सर्वैरपि करणीयमेव। ये हि शुण्ठी-जीरक-यवानी-मेथिकादीन्युग्रवीर्याणि पारम्परिकरूपेण प्रयोज्य-मानानि रसायनात्मकानि भेषजानि सन्ति, तेषु विधेः परिपालनं परमावश्यकं वर्तते। विशेषेण तु सर्वेष्वेव रसायनयोगप्रयोगेषु पथ्यापथ्यपरिपालन-मावश्यकम्।**

सभी औषधियों का उपयुक्त शुभ फल विधिपूर्वक सेवन करने से ही होता है, इसमें कभी थोड़ा सा भी स्खलन (चूक) होने पर फल में न्यूनाधिकता होती ही है, किन्तु रसायन का फल तो विधिपूर्वक सेवन करने पर ही मिलता है, विना विधि के सेवन करने वाले के तो हानि की भी सम्भावना रहती है। इसलिए रसायन का सेवन तो सर्वदा विधिपूर्वक ही करना चाहिए। सामान्यतया शास्त्रोक्त रसायन योगों के प्रयोग में सर्वदा भिन्न-भिन्न विधियों का और पथ्यापथ्यों का निर्देश है ही, फिर भी कतिपय सामान्य निर्देशों का पालन तो सभी के द्वारा किए जाने योग्य ही है। जो सोंठ, जीरा, अजवायन एवं मेथी इत्यादि उग्रवीर्य पारम्परिकरूप से प्रयोग करने योग्य रसायनस्वरूपक भेषजद्रव्य हैं, उनमें विधि का परिपालन परमावश्यक है। विशेषरूप से तो सभी रसायनयोगों के प्रयोगों में पथ्यापथ्य का परिपालन आवश्यक है।

**द्विविधः प्रयोगः**

**ऋषयः रसायनानां प्रयोगं द्विविधं विदुः। एकः प्रयोगः कुटीप्रावेशिकोऽपरश्च वातातपिकः वर्तते। एतयोर्द्वयोः विध्योः क्रमशः वर्णनं प्रस्तूयते-**

**1. कुटीप्रावेशिको विधिः-**

**अस्मिन् विधौ विशिष्टावधानताया आवश्यकता वर्तते। विशिष्टे कक्षे तिष्ठन्नेव रसायनस्य प्रयोगोऽस्मिन् विधौ क्रियते । शुभतिथिकरण-नक्षत्रादिषु तं रसायनप्रयोगाभिकांक्षिणमर्हं पुरुषं यथोचिताभ्यां स्नेहस्वेदाभ्यामुपपादयेत् यदि चेदस्मिन्नन्तरे शारीरः मानसो वा व्याधिः कश्चिदागच्छेत् तमेव व्याधिं तावदस्योपावर्तयितुं यतेत। तं व्याधिमुपावर्त्य पुनः नवीनरूपेण स्नेहस्वेदाभ्यां प्रयोगः तत्र करणीयः। स्नेहस्वेदाभ्यां विधिं तु भिषगेव जानाति, अत एवातुरालयेऽथवा सुसज्जिते सर्वोपकरणयुक्ते स्वे भवन एव स्नेहस्वेदौ सम्पादनीयौ पश्चाच्च विधि- पूर्वकं तत्र संशोधनं (वमनं विरेचनं च) दक्षैः भिषग्भिः करणीयम्।**

**द्विविध प्रयोग -**

ऋषि रसायन का प्रयोग दो प्रकार का कहते हैं। एक प्रयोग कुटीप्रावेशिक है और दूसरा वातातपिक है। इन दोनों विधियों का वर्णन क्रमशः प्रस्तुत किया जा रहा है-

**1. कुटीप्रावेशिक विधि-**

इस विधि में विशिष्ट सावधानी की आवश्यकता है। इस विधि में विशिष्ट कक्ष में रहते हुए ही रसायन का प्रयोग किया जाता है। शुभतिथि, करण नक्षत्रादि में उस रसायन की आकांक्षा करने वाले योग्य व्यक्ति में उपयुक्त स्नेहन और स्वेदन करना चाहिए, यदि इस बीच में शारीरिक या मानसिक व्याधि कोई सी भी आ जाती है तो उस व्याधि को ही पहले दूर करने का प्रयत्न करना चाहिए। उस व्याधि को दूर कर के पुनः नवीन रूप से उसमें स्नेहन स्वेदन का प्रयोग करना चाहिए। स्नेहन और स्वेदन की विधि को तो वैद्य ही जानता है, इसलिए आतुरालय में या सुसज्जित सभी उपकरणों से युक्त अपने भवन में ही स्नेहन-स्वेदन करने चाहिए और उसके बाद उस व्यक्ति के विधिपूर्वक संशोधन (वमन और विरेचन) दक्ष चिकित्सकों के द्वारा करना चाहिए।

**संशोधनानन्तरं तं रोगिणं संसर्जनं कारयित्वा कुटीं प्रवेशयेत्। कुटीप्रवेशानन्तरं विशिष्टयोगस्य सेवनं कारयेत्। रसायनप्रयोगाणां पृथक्-पृथक्रूपेण नियतः कालोऽपि वर्तते, अतः नियतकालपर्यन्तं कुट्यां स्थित्वैव तस्य रसायन-योगस्य प्रयोगः करणीयः। रसायनप्रयोगकाले कदापि बहिर्गमनं न करणीयम्। विण्मूत्रयोः विसर्जनमपि तत्रैव करणीयम्। स्नानाभ्यङ्गोद्वर्त-नादीनामप्यपेक्षितानां यथावश्यकः प्रयोगस्तत्रैव कुट्यामेव विधेयः। अस्यां कुट्यामावश्यका-नामुपकरणा-नामात्ययिक-परिस्थितावुपयुक्ताना मौषधद्रव्याणां योगानाञ्च व्यवस्था करणीया। पथ्यापथ्यपरि-पालनमप्यावश्यकरूपेण विधेयम्। रसायनप्रयोगानन्तरं परिहारकालोऽपि तत्रैव यापनीयः। परिहारकालस्तु निश्चितः त्रिंशत् दिनानां वर्तते पुनरपि चिकित्सकस्य निर्देशेन कालस्य यापनं तत्रैव करणीयम्, सामान्यतया पञ्चदशदिनान्येव परिहारार्थं पर्याप्तानि वर्तन्ते। पथ्यापथ्यपरिपालनं तु कुटीतः बहिरागमनानन्तरमपि करणीयम्। एतादृशः परिहारकालस्तु रसायनप्रयोगकालाद् द्विगुणो वर्तते।**

संशोधन के बाद तो उस रोगी को संसर्जन (अन्न साधने की एक विशिष्ट प्रकिया) कराकर कुटी में प्रवेश करना चाहिए। कुटी में प्रवेश के बाद उसको विशिष्ट योग का सेवन कराना चाहिए। रसायनप्रयोगों का पृथक्-पृथक् रूप से नियतकाल भी है, अतः नियतकाल पर्यन्त कुटी में रह कर ही उस रसायन योग का प्रयोग करना चाहिए। रसायन के प्रयोगकाल में कभी भी कक्ष से बाहर नहीं जाना चाहिए। मल-मूत्र का विसर्जन भी वहीं (कक्ष में बनाए गए शौचालय में) करना चाहिए। स्नान, अभ्यङ्ग उबटन आदि जो भी अपेक्षित हो उनका यथावश्यक प्रयोग वहीं कुटी में ही करना चाहिए। इस कुटी में आवश्यक उपकरणों की एवं आत्ययिक परिस्थिति में उपयुक्त औषध-द्रव्यों की तथा योगों की व्यवस्था करनी चाहिए। पथ्यापथ्य का परिपालन भी आवश्यकरूप से करना चाहिए। रसायन-प्रयोग के बाद परिहारकाल भी वहीं बिताना चाहिए। परिहारकाल तो निश्चित 30 दिन का है फिर भी चिकित्सक के निर्देश से काल का यापन (बिताना) वहीं करना चाहिए। सामान्यतया 15 दिन ही परिहार के लिए पर्याप्त होते हैं (विशेष प्रयोग हो तो 30 दिन परिहार करना चाहिए)। पथ्यापथ्य का परिपालन तो

कुटी के बाहर आने के बाद भी करना चाहिए। इस तरह का परिहारकाल तो रसायन प्रयोग के काल से दो गुना होता है।

**रसायनप्रयोगानन्तरं दशदिनपर्यन्तं तस्यामेव कुट्यां वासः कर्तव्यः। कुटीतः बहिरागमनन्तु सहसा न करणीयम्। दश दिनानन्तरं समीपस्थे द्वितीयकक्षे वातायनादियुक्ते कक्षे दशदिनपर्यन्तं निवासः कर्तव्यः। तदनन्तरञ्चान्ये तृतीयकक्षे दशदिनानि यावत् स्थातव्यम्, यस्मिन् हि गवाक्षादीनामाधिक्यं भवेत् वातावरणस्य च बहिः वातावरणात् किञ्चिदूनत्वं तस्मिन् कक्षे स्थापनीयम्। पश्चाद् बहिः वातावरणे यत्र कुत्रापि गमनं कर्तुं शक्नोति, आहारपरकयोः पथ्यापथ्ययोः परिपालनन्तु पूर्ववदेव विधेयम्। यथाहि सुश्रुते- ..... एवं दशरात्रं, ततोऽन्यद्दशरात्रं द्वितीये परिसरे वर्तेत, ततस्तृतीये परिसरे स्थिरीकुर्वन्नात्मानमन्यद् दशरात्रमासीत, किञ्चिदातपपवनान् वा सेवेत, पुनश्चान्तः प्रविशेत्, न चात्मानमादर्शेऽप्सु वा निरीक्षेत रूपशालित्वात्, ततोऽन्यद्दशरात्रं क्रोधादीन् परिहरेत्, एवं सर्वेषा-मुपयोगविकल्पः।.....(सु.चि. 29/12)**

रसायनप्रयोग के बाद दश दिन  तक उसी कुटी में निवास करना चाहिए। कुटी के बाहर सहसा नहीं आना चाहिए। दश दिन के बाद समीपस्थ दूसरे कक्ष में दश दिन तक निवास करना चाहिए। उसके बाद अन्य तृतीय कक्ष मे ंदश दिन तक ठहरना चाहिए, जिसमें कि खिड़कियों आदि (हवा के आने-जाने के मार्ग) की अधिकता हो। उस कक्ष में बाह्य वातावरण से कुछ न्यून वातावरण (वैसा ही) स्थापित करना चाहिए। उसके बाद बाह्य वातावरण में जहाँ कहीं भी गमन कर सकता है। आहारपरक पथ्यापथ्य का परिपालन तो पहले की तरह ही करते रहना चाहिए। जैसा कि सुश्रुत में कहा गया है=

इस प्रकार से दश दिन तक (उसी कुटी में रहना चाहिए) उसके बाद दूसरे दश दिन द्वितीय परिसर (द्वितीय कक्ष एवं उसके आस-पास) में रहना चाहिए। उसके बाद तृतीय परिसर में अपने आप को स्थिर करता हुआ (रहता हुआ) दश दिन तक ठहरे। कुछ धूप और वायु का सेवन करे, फिर वापस अन्दर (कक्ष में तृतीय में) प्रवेश करे। अपने आप को दर्पण में अथवा जल में न देखे रूपशाली होने के कारण (रसायनसेवन से अधिक रूपवान् हो जाता है), उसके बाद अन्य दश दिन तक क्रोधादि न करे, इस प्रकार सभी के (रसायन के) उपयोग का यह तरीका है।

**राजस्थानप्रान्ते तु शुण्ठ्यादीनां प्रयोगकाले पारम्परिकरूपेण एवमेव कुर्वन्ति जनाः, यदा ते अधिकमात्रायामेषां द्रव्याणां प्रयोगं कुर्वन्ति तदा तु कुटीप्रावेशिकविधिनैव सर्वं पथ्यापथ्यं पालयन्तः तत्रैव च निवसन्त एवमेव रसायनं प्रयुञ्जन्ति।**

**2. वाताातपिको विधिः-**

**अस्मिन् विधौ तु कुटीप्रवेशं विनैव रसायनप्रयोगं कुर्वन्ति। अत्रोग्रवीर्याणां शुण्ठ्यादीनामथवा शास्त्रोक्तानां विशिष्टानां च्यवनप्रकाशब्राह्म-रसायन-आमलकीरसायनादीनामपि प्रयोगमल्प-मात्रायां कर्तुं शक्नोति कोऽपि जनः। संशोधन-न्त्वत्राप्युपयोगी वर्तते, संशोधनं विनाऽपि केवलेन मृदुविरेचनेन एषः प्रयोगः फलदो भवति, किन्तु परिणामे (फलावाप्तौ) तु न्यूनता भवत्येव। अतः संशोधनं मृदुविरेचनं वा करणीयमेव। विधावस्मिन् बाह्यवातावरणेन सम्पृक्तः जनः रसायनमुपभुङ्क्ते। सः सामान्यरूपेण स्वस्य दैनन्दिनानि कर्माणि कर्तुं शक्नोति। अस्मिन् विधौ नियमितरूपेण**

**रसायनयोगस्यानुपानादिभिः सह प्रयोग आवश्यकः। आहारात्मके पथ्यापथ्यपरिपालने विशिष्टावधानन्तु रसायनयोगानुसार्येव करणीयम्, किन्तु वातातपानां सामान्यानां सेवेने न काऽपि बाधा वर्तते। विशिष्टानां झञ्झावात-तीव्रातप-वृष्ट्यादिभिस्तु परिहारो ऽत्रापि विधेय एव। अन्यथा हानिर्भवति। इत्थं रसायनप्रयोगस्य प्रसिद्धौ द्वौ विधी वर्तेते ताभ्यां रसायन प्रयोगो विधेयः। यथो हि प्रोक्तं चरकाचार्येण-**

**न केवलं दीर्घमिहायुरश्नुते,**
**रसायनं यो विधिवभीन्नषेवते।**
**गतिं स देवर्षिनिषेवितां शुभां,**
**प्रपद्यते ब्रह्म तथेति चाक्षयम्।।**

**( च. चि. 1/1/80 )**

**ब्रह्म मोक्षः। मोक्षसाधनत्वञ्चेह रसायनस्य विशुद्धसत्त्व-कर्तृतयोच्यते।**

राजस्थान प्रान्त में तो सोंठ आदि के सेवनकाल में पारम्परिक रूप से लोग ऐसा ही करते हैं। जब वे (रसायन सेवनक्रम में) इन द्रव्यों का अधिक मात्रा में प्रयोग करते हैं, तब तो कुटीप्रावेशिक विधि से ही सम्पूर्ण पथ्यापथ्य का पालन करते हुए वहीं (कुटी में कक्ष में ही) रहते हुए इसी तरह से रसायन का प्रयोग करते हैं।

**2. वातातपिक विधि-**

इस विधि में तो कुटी प्रवेश के बिना ही रसायन का प्रयोग करते हैं। इसमें सोंठ आदि उग्रवीर्य द्रव्यों का अथवा शास्त्रोक्त विशिष्ट च्यवनप्राश, ब्राह्मरसायन, आमलकीरसायन आदि का भी प्रयोग अल्प मात्रा में कोई भी व्यक्ति कर सकता है। इसमें संशोधन तो अत्यन्त उपयोगी है। संशोधन (वमन-विरेचन) के बिना भी यह प्रयोग (रसायन का वातातपिक प्रयोग) फल देने वाला होता है, किन्तु परिणाम में (फलप्राप्ति में) तो न्यूनता होती ही है। इसलिए संशोधन या मृदुविरेचन तो करना ही चाहिए। इस विधि में बाह्य वातावरण के सम्पर्क में रहता हुआ व्यक्ति रसायन का उपयोग करता है। वह सामान्य रूप से अपने दैनन्दिन कार्यों को कर सकता है। इस विधि में नियमित रूप से रसायनयोग का अनुपानादि के साथ प्रयोग आवश्यक है। आहार से सम्बन्धित पथ्यापथ्य के परिपालन में तो विशेष सावधानी रसायन के प्रयोग के अनुसार ही रखनी चाहिए। लेकिन सामान्य वायु और सामान्य धूप के सेवन में कोई बाधा नहीं है।

झञ्झावात, तीव्र धूप और बर्षा आदि विशिष्टों से तो यहाँ भी परिहार करना ही चाहिए (इन से बचना चाहिए)। अन्यथा हानि होती है। इस प्रकार से रसायन प्रयोग की दो विधियाँ है, उनसे रसायन का प्रयोग करना चाहिए। जैसा कि आचार्य चरक ने कहा है-

इस रसायनप्रयोग में केवल दीर्घ आयु ही नहीं भोगता है, बल्कि जो विधिपूर्वक रसायन का सेवन करता है, वह देवताओं और ऋषियों के द्वारा सेवन की गई शुभ गति (स्थिति) को प्राप्त करता है तथा अक्षय ब्रह्म (मोक्ष) को प्राप्त करता है। (चरक)

ब्रह्म मोक्ष को कहा गया है। रसायन के द्वारा शुद्ध सत्व प्राप्त होता है, अतः इस कर्तृत्व के कारण ही इसे मोक्षसाधन (मोक्ष प्राप्त कराने वाला उपाय) कहा गया है (यह मोक्षसाधनत्व इसीलिए है।)

**80, सेनापति हाउस के पीछे, प्रेमनगर**
**झोटवाडा, जयपुर ( राजस्थान )**

# दिल्ली संस्कृत अकादमी, दिल्ली सरकार

**प्लाट सं. 5, झण्डेवालान, करोल बाग, नई दिल्ली-110005**
**दूरभाष सं- 23635592, 23681835**
**ईमेल - delhisanskritacademy@gmail.com**
**वेब साईट - www.sanskritacademy.delhi.gov.in**


## आवश्यक-सूचना

## अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगिता ( 2015-2016 )

दिल्ली संस्कृत अकादमी , दिल्ली सरकार द्वारा भारतवर्ष के नवोदित संस्कृत कवियों को प्रोत्साहित करने के उद्देश्य से वर्ष 2015-16 में अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगिता का आयोजन दिनांक 18.3.2016 को अकादमी के सभागार में किया जा रहा है। एतत्सम्बन्धी निर्धारित आवदेन पत्र तथा नियम अकादमी कार्यालय से दिनांक 1.3.2016 से 10.3.2016 तक नि:शुल्क प्राप्त किये जा सकते हैं। नियम तथा आवेदन पत्र अकादमी की उपर्युक्त वेबसाइट से भी डाउनलोड किये जा सकते हैं। अकादमी कार्यालय में आवेदन-पत्र जमा करने की अन्तिम तिथि 10.3.2016 है।

हस्ताक्षर
**( डॉ जीतराम भट्ट )**
सचिव

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

निर्माता

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

**ए.सी. प्रेशर पाइप्स**

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

**छत्त एक, लाभ अनेक**

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

**राष्ट्रीय विचारों के लिए पढ़ें**

**पाञ्चजन्य** **Organiser**

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**
**Reach millions of consumers through our weeklies**

**भारत प्रकाशन (दिल्ली) लि.**
2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,